Table of contents

# ईशावास्योपनिषत्

## सटिप्पणशाङ्करभाष्ययुता

प्रकाशनस्थानम्

अध्यात्मप्रकाशकार्यालयः

होळेनरसीपुरम्

२००२

०८१७-५७३८२०

शुद्धशाङ्करप्रक्रियाप्रकाशकाः

# कतिचन वेदान्तग्रन्था

# BACK TO SHANKARA SERIES

*Editor and Commentator :*

**SWAMI SATCHIDANANDENDRA SARASWATI**

**ईशकेनकाठकमुण्डकोपनिषदः, तैत्तिरीयशीक्षावल्ली च** - सटिप्पणभाष्ययुताः -

The Isa, Kena, Kathaka and Mundaka Upanishads and the Shikshavalli of theTaittiriya, critically edited separately with the Bhashya and Notes.

**आनन्दवल्ली भृगुवल्ली च** - सभाष्या, भाष्यार्थाविमर्शिनीसहिता -

Anandavalli and Bhriguvalli with an elaborate original commentary. Contains a critical review of all mis - interpretations as also of objections of adverse schools.

**माण्डूक्यरहस्यविवृत्तिः**- उपनिषदो गौडपादकारिकाणां च अभिनवा व्याख्या -

This is the first attempt of its kind to present both Gaudapada and S'aṅkara in their true perespective.

**सुगमा** - अध्यासभाष्यस्य नवीनव्याख्या -

A new original sub-commentary on the Adhyasa Bhashya pointing out a straight and smooth way to the essentials of the vedanta method. All later undersirable accretions cleared out of the way.

**सूत्रभाष्यार्थतत्त्वविवेचनी** -

A new commentary on S'aṅkar's Bhashya bringing out the salient features of S'aṅkara's system and its method. Written on the same lines as the Janmadyadhikarana.

*Apply for descriptive catalogue to -*

**ADHYATMA PRAKASHA KARYALAYA**

HOLENARASIPUR (Hassan Dist., Mysore State).

अध्यात्मग्रन्थावलिः

# ईशावास्योपनिषत्

## सटिप्पणशाङ्करभाष्ययुता

क्रमांङ्कः ३८

प्रकाशनस्थानम्
अध्यात्मप्रकाशकार्यालयः
होळेनरसीपुरम्
२००२

# THE IS'ĀVĀSYA UPANIS'AD

WITH

SRI S'AṄKARA'S COMMENTARY

Edited with notes by

**SRI SRI SATCHIDANANDENDRASARASWATISWAMIJI**

Adhyatma Prakasha Karyalaya
Holenarasipur
573211

0817-573820

प्रथमं मुद्रणम् - १९५३
द्वितीयं मुद्रणम् - २००२

सर्वेऽधिकाराः स्वायत्तीकृताः
ALL RIGHTS RESERVED

Composed at
Prashanth Enterprises
No.10/1, Nagasandra
T.R.Nagar Po., Bangalore - 28
Phone : 6764650

Printed at
Ganesha Maruthi Printers
No.76, 3rd Block, 6th Main Road
T.R.Nagar, Bangalore-61
Phone : 6662232

# INTRODUCTION

## The Place of the Upanishad in the Vedas

*S'ukla-Yajurveda* is divided into fifteen S'ākhas, or seventeen S'ākhas, according to different traditions. Only two versions, however, are now prevalent and studied by the followers of that Veda.

One Bhāshya ascribed to S'aṅkarācārya, on the Īs'a or the Īs'āvāsya Upanishad forming the fortieth chapter of the kāṇva version, is being studied by the followers of the S'āṅkarādvaita school. It is also known as the *Samhitopanishad*, because it forms part of *Samhita*, the collection of the Mantras of the *Karmakāṇḍa* (Ritual Portion) of that Veda, while the other Upanishads commented upon by S'āṅkara are mostly to be found in the Āraṇyakas of the Brāhmaṇa portion of the various Vedas.

## Subject-matter of the Upanishad

Authors of some Bhāshyās antecednet to Saṅkara were of opinion that this Upanishad

teaches the combined practice of *karma* (ritual) and *upāsanā* (meditation), especially as the mantras in it, are found in the *karma-kāṇḍa* (portion devoted to rituals). The author of the present Bhāshya, rejects this interpretation and opines that these mantras purport to teach the true nature of Ātman or the Universal Self. The latter portion of the Upanishad, however, according to S'aṅkara, does treat of the fruits of the combined practice of karma and meditation.

**The Present Edition**

The present edition of the Upanishads contains the text of the mantras in Devanagari. A summary of the teaching of the Upanishad, has been also given at the end. The foot-notes added are expected to stimulate original thought on the part of the critical reader not only in catching the spirit of the teaching contained in the Upanishad according to S'aṅkara, but also in co-ordinating the contexts of the Bhāshya with the other Bhāshyās ascribed to that teacher. To this end also, has been added the *Appendix* as well as the Index of some important Sanskrit words occuring in the Bhāshya. I have not relied on the Tika

ascribed to Ānandagiri by the editor of the Ānandāshrama Edition of this Upanishad for the obvious reason that he is a recent writer referring as he does to Bhāskarācārya and never answers to S'uddhānanda, Ānandajñāna's guru, as the colophon in the Ānandās'rama Edition stresses.

Some of the mantras in the Upanishad, are explained in a different way in other Bhāshyas, (on the Aitareya, Taittirīya, Gaudapāḍa Kārikā and the Brahma-Sūtrās), and they make use of the Mādhyandina version and not the Kāṇva version. We find no explanation for this difference of interpretation. Some critics therefore doubt whether Ādi-S'aṅkarācārya may be rightly regarded as the genuine author of this Bhāshya. The Appendix would be of some help to the critical student in coming to his own decision in the matter.

AUTHOR.

# GENERAL PREFACE

(To the First Edition)

The present edition of Sri S'āṅkaracharya's Upanishad-Bhashyas, is intended for readers who wish to have at a moderate price the plain text of S'āṅkara's works unencumbered by commentaries and sub-commentaries but provided with such aids to study as a beginner is likely to need in appreciating the original.

Every volume of the series has been provided with an Introduction, Short Notes on points of special interest, References to parallel passages in the other works of the great Acharya, a Summary of the Upanishad, and an Index.

It is hoped that the systematic division of the text into paragraphs with indication of important various readings, the tracing of quotations to their originals, and the close attention paid to typographical details will all combine to make this edition specially convenient for the earnest reader.

Publisher.

# प्रस्तावना

## (प्रथममुद्रणस्य)

शुक्लयजुर्वेदस्य काण्वमाध्यन्दिनभेदेन द्वे शाखे सुप्रसिद्धे । तत्र काण्वपाठमनुरुध्यैव भगवत्पादैरीशावास्योपनिषदो भाष्यं निरमायि । सेयं संहितायाश्चत्वारिंशेऽध्याये समुपलभ्यमानत्वात् 'संहितोपनिषद्' इत्यप्यभिधीयते क्वचित् ॥

कर्मकाण्डस्यान्तिमभागे पठितत्वादस्या उपनिषदः कर्मसंबन्धिज्ञानमेवात्र प्रतिपाद्यमिति, अस्या एकादशतमे मन्त्रे परमार्थज्ञानकर्मणोः समुच्चय एव विधित्सित इति, चतुर्दशे मन्त्रे परिणामवादः सूचित इति च केचिद् भाष्यकारा मेनिरे भर्तृप्रपञ्चभास्कराचार्यप्रभृतयः । भगवत्पादाः पुनः प्रवृत्तिनिवृत्तिलक्षणं वैदिकं धर्मद्वयविभागं सूचयित्वा, अकर्मशेषस्यात्मनो याथात्म्यप्रकाशनायैव प्राधान्येन प्रवृत्तेयमुपनिषदिति प्रदर्शयन्ति ॥

अत्र संक्षेपेण सूचितस्य विद्याविद्याविभागस्य सविस्तरं बृहदारण्यके प्रतिपादयिष्यमाणत्वात् तत्रैव वेदान्तसिद्धान्तः सपरिकरं अध्यवसेयो मुमुक्षुभिरिति -

सुधियामनुचरः

श्री सच्चिदानन्देन्द्रसरस्वतीभिक्षुः

## (द्वितीयमुद्रणस्य)

अस्मिन् द्वितीयमुद्रणे न कुत्रापि किंचिदपि परिवर्तनमस्ति ।

अध्यात्मप्रकाशकार्यालये,

६.८.२००२ प्रकाशकः

# ग्रन्थविभागानुक्रमः


| | | |
|---|---|---|
| १. | सामान्योपक्रमणिका [आंग्लभाषामयी] | ५ |
| २. | प्रस्तावना | ६ |
| ३. | विषयानुक्रमणिका | ७ |
| ४. | सङ्केताक्षरविवरणम् | ९ |
| ५. | उपनिषत् सभाष्या | १-३१ |
| ६. | उपनिषत्सारः | ३२-३३ |
| ७. | उपनिषन्मूलम् [माध्यन्दिनपाठः] | ३४-३८ |
| ८. | परिशिष्टम् | ३९-४१ |
| ९. | मन्त्रानुक्रमणिका | ४२ |
| १०. | भाष्यस्थमुख्यशब्दसूची | ४३-४६ |
| ११. | प्रमाणवाक्याना मूलग्रन्थानुक्रमः | ४७-४८ |


------

# भाष्ये विशेषविषयाः

(विषयानुक्रमणिका) पृष्ठे


| | |
|---|---|
| उपनिषद् आत्मयाथात्म्यप्रकाशकत्वम् | २ |
| आत्मविदो ज्ञाननिष्ठायामधिकारः | ३ |
| अज्ञस्य कर्मनिष्ठा | ५ |
| निष्ठाद्वयविभागे युक्तिः | ६ |
| अविद्वान् नित्यसंसारभागी | ७ |
| आत्मयाथात्म्यम् | ८ |
| आत्मविज्ञानफलम् | ११ |
| आत्मयाथात्म्योपसंहारः | १४ |
| ज्ञानकर्मसमुच्चयमन्त्रसंबन्धः | १५ |
| अविद्वदादिनिन्दा | १८ |
| ज्ञानकर्मणोरवान्तरफलभेदः | १९ |
| ज्ञानकर्मसमुच्चयः | २० |
| व्याकृताव्याकृतोपासनयोः प्रत्येकं निन्दा | २१ |
| व्याकृताव्याकृतोपासनयोरवान्तरफलभेदः | २२ |
| व्याकृताव्याकृतोपासनासमुच्चयः | २३ |
| समुच्चयानुष्ठातुर्मार्गयाचना | २४ |
| समुच्चये विचारः | २९ |

# सङ्केताक्षराणां विवरणम्

| | |
|---|---|
| अ. | अष्टेकरकंपेनीप्रकाशितपुस्तके पाठान्तरम् |
| आ. | आनन्दाश्रमप्रकाशितपुस्तके पाठान्तरम् |
| उ.सा.प. | उपदेशसाहस्री पद्यप्रबन्धः |
| क. | कठोपनिषत् |
| गी. | भगवद्गीता |
| गी.भा. | भगवद्गीताभाष्यम् |
| छां. | छान्दोग्योपनिषत् |
| जै.सू. | जैमिनीयपूर्वमीमांसासूत्राणि |
| तै. | तैत्तिरीयोपनिषत् |
| तै.भा. | तैत्तिरीयभाष्यम् |
| प्र.भा. | प्रश्नोपनिषद्भाष्यम् |
| बृ. | बृहदारण्यकोपनिषत् |
| बृ.भा. | बृहदारण्यकोपनिषद्भाष्यम् |
| महा.नारा. | महानारायणोपनिषत् |
| मुं.भा. | मुण्डकोपनिषद्भाष्यम् |
| मो. | मोक्षधर्मः |
| वि.पु. | विष्णुपुराणम् |
| वा. | वाणीविलासमुद्रालयप्रकाशितपुस्तके पाठान्तरम् |
| शत. | शतपथब्राह्मणम् |
| शा.भा. | शाबरं भाष्यम् |
| श्वे. | श्वेताश्वतरोपनिषत् |
| सू.भा. | सूत्रभाष्यम् |

--------

ॐ

श्रीमच्छाङ्करभाष्यसंयुता

# ईशावास्योपनिषत्

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥
ॐ शान्तिः शान्तिः शान्तिः ॥

## अथ भाष्यावतरणिका

**'ईशावास्यम्'** इत्यादयो मन्त्राः कर्मस्वविनियुक्ताः, तेषां अकर्मशेषस्यात्मनो[1] याथात्म्यप्रकाशकत्वात् । याथात्म्यं चात्मनः शुद्धत्वापापविद्धत्वैकत्वनित्यत्वाशरीरत्वसर्वगतत्वादि वक्ष्यमाणम् (७,८) । तच्च कर्मणा विरुध्यत इति युक्त एवैषां कर्मस्वविनियोगः । न ह्येवंलक्षणमात्मनो याथात्म्यं उत्पाद्यं,[2] विकार्यं,

1. कर्मशेष आत्मा कर्तृत्वभोक्तृत्वादियुक्तः, जन्मान्तरलोकान्तरसम्बन्धी कर्मकाण्डेऽधिगतः ; तद्भिन्नः अकर्मशेषः ॥
2. सू. भा. १-१-४ ; बृ. भा. ३-३-१ ; तै. भा. १-१२ ;
उत्पाद्यं घटादिवत्, विकार्यं दध्यादिवत्, आप्यं ग्रामादिवत्, संस्कार्यं आदर्शादिवत् ॥

आप्यं, संस्कार्यं, कर्तृभोक्तृरूपं वा; येन कर्मशेषता स्यात् । सर्वासामुपनिषदां आत्मयाथात्म्यनिरूपणेनैवोपक्षयात्, **गीतानां मोक्षधर्माणां** चैवंपरत्वात् । तस्मात्, आत्मनोऽनेकत्वकर्तृत्व-भोक्तृत्वादि चाशुद्धत्वपापविद्धत्वादि चोपादाय लोकबुद्धिसिद्धं कर्माणि विहितानि । यो हि कर्मफलेनार्थी दृष्टेन ब्रह्मवर्चसादिना अदृष्टेन स्वर्गादिना च 'द्विजातिरहं न काणत्वकुब्जत्वाद्यनधिकार-प्रयोजकधर्मवान्'[1] इत्यात्मानं मन्यते सोऽधिक्रियते कर्मस्विति **ह्यधिकारविदो**[2] वदन्ति ॥

तस्मादेते मन्त्रा आत्मनो याथात्म्यप्रकाशनेन आत्मविषयं स्वाभाविकमज्ञानं[3] निवर्तयन्तः, शोकमोहादिसंसारधर्मविच्छित्ति-साधनमात्मैकत्वादिविज्ञानं उत्पादयन्तीति, एवमुक्ताधिकार्य-भिधेयसंबन्धप्रयोजनान्[4] मन्त्रान् संक्षेपतो व्याख्यास्यामः ॥

---

1. 'काणत्वकुणित्वाद्य०' (इति वा. पुस्तके) ॥
2. शा. भा. जै. सू. ६-१-२५ तमसूत्रादारभ्य ४२ तमसूत्रपर्यन्तं द्रष्टव्यम् ॥
3. 'स्वाभाविककर्मविज्ञान०' (इति वा. अ. पुस्तकयोः) ; स्वाभाविकम्-अविचारदशायां स्वभावसिद्धम् ॥
4. आत्मयाथात्म्यमभिधेयम्, कर्मकाण्डेनागतार्थत्वं संबन्धः, शोक-मोहादिविच्छित्तिः प्रयोजनं, तत्कामोऽधिकारीति विशिष्टाधिकार्यादिमत्त्वं मन्त्राणाम् ॥

## अथोपनिषत्

ईशावास्यमिदꣳ सर्वं
यत्किंच जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथा
मा गृधः कस्य स्विद्धनम् ॥ १ ॥

[इदं यत्किंच जगत्यां जगत्, (तत्) सर्वम् ईशा वास्यम्। तेन त्यक्तेन (आत्मानं) भुञ्जीथाः। कस्य स्विद् धनं मा गृधः ॥]

**ईशावास्यमिति**। ईशा--ईष्टे[1] इति ईट्, तेन ईशा। ईशिता परमेश्वरः परमात्मा सर्वस्य। स हि सर्वमीष्टे सर्वजन्तूनामात्मा सन् प्रत्यगात्मतया। तेन स्वेन रूपेणात्मना ईशा वास्यं-आच्छादनीयम्[2]। किम्? इदं सर्वं यत्किंच यत्किंचित् जगत्यां-पृथिव्यां जगत् तत् सर्वम्। स्वेनात्मना ईशेन प्रत्यगात्मतया 'अहमेवेदं सर्वम्' इति परमार्थसत्यरूपेण अनृतमिदं[3] सर्वं चराचरं आच्छादनीयं परमात्मना[4]। यथा चन्दनागर्वादेरुदकादि-संबन्धजक्लेदादिजं औपाधिकं दौर्गन्ध्यं तत्स्वरूपनिघर्षणे-नाच्छाद्यते स्वेन पारमार्थिकेन गन्धेन, तद्वदेव हि स्वात्मन्यध्यस्तं

1. ईश-ऐश्वर्ये इति धातोः क्विपि रूपमीडिति ॥
2. वस-आच्छादने; ऋहलोर्ण्यदिति ण्यत्प्रत्यय इति भावः ॥
3. तै. भा. २-६
4. गी. भा. १३-२२ ; १५-१७

स्वाभाविकं कर्तृत्वभोक्तृत्वादिलक्षणं जगत् द्वैतरूपं जगत्यां पृथिव्याम् । 'जगत्याम्' इत्युपलक्षणार्थत्वात् सर्वमेव नामरूपकर्माख्यं[1] विकारजातं परमार्थसत्यात्मभावनया त्यक्तं स्यात् । एवमीश्वरात्मभावनया युक्तस्य पुत्राद्येषणात्रयसंन्यासे[2] एवाधिकारो न कर्मसु ॥

तेन त्यक्तेन त्यागेनेत्यर्थः । न हि त्यक्तो मृतः पुत्रो भृत्यो वा आत्मसंबन्धिताया अभावादात्मानं पालयति ; अतस्त्यागेनेत्ययमेवार्थः । भुञ्जीथाः पालयेथाः ॥

एवं त्यक्तैषणस्त्वं मा गृधः गृधिम् आकाङ्क्षां मा कार्षीर्धनविषयाम् । कस्य स्विद् धनं कस्यचित् परस्य स्वस्य वा धनं मा काङ्क्षीरित्यर्थः । 'स्वित्' इत्यनर्थको निपातः । अथवा मा गृधः । कस्मात् ? 'कस्य स्विद्धनम् ?' इत्याक्षेपार्थः । न कस्यचिद्धनमस्ति यद् गृध्येत । 'आत्मैवेदं सर्वम्[3]' इतीश्वरभावनया सर्वं त्यक्तम् ; अत आत्मन एवेदं सर्वं, आत्मैव च सर्वम् । अतो मिथ्याविषयां गृधिं मा कार्षीरित्यर्थः ॥

एवमात्मविदः पुत्राद्येषणात्रयसंन्यासेन आत्मज्ञाननिष्ठतया आत्मा रक्षितव्य इत्येष वेदार्थः । अथेतरस्य अनात्मज्ञतया आत्मग्रहणाशक्तस्य इदमुपदिशति मन्त्रः -

---

1. बृ. १-६-१, २, ३.

2. पुत्रैषणा, वित्तैषणा, लोकैषणेत्येषणा-त्रयम् ; बृ. ३-५-१, ४-४-२२.

3. छां. ७-२५-१.

कुर्वन्नेवेह कर्माणि
जिजीविषेच्छतꣳ समाः ।
एवं त्वयि नान्यथेतोऽस्ति
न कर्म लिप्यते नरे ॥ २ ॥

[इह कर्माणि कुर्वन्नेव शतं समाः जिजीविषेत् । एवं त्वयि नरे इतो नान्यथा अस्ति, (येन) कर्म न लिप्यते ॥]

**कुर्वन्नेवेति** । कुर्वन्नेव निर्वर्तयन्नेव इह कर्माणि अग्निहोत्रादीनि जिजीविषेत् जीवितुमिच्छेत् शतं शतसङ्ख्याकाः समाः संवत्सरान् । तावद्धि पुरुषस्य परमायुर्निरूपितम्[1] । तथा च प्राप्तानुवादेन[2] 'यज्जिजीविषेच्छतं वर्षाणि, तत् कुर्वन्नेव कर्माणि' इत्येतद्विधीयते ॥

एवं एवंप्रकारेण त्वयि जिजीविषति नरे नरमात्राभिमानिनि इतः एतस्मात् अग्निहोत्रादीनि कर्माणि कुर्वतो वर्तमानात् प्रकारात्, अन्यथा प्रकारान्तरं नास्ति, येन प्रकारेण अशुभं[3] कर्म न लिप्यते कर्मणा न लिप्यसे इत्यर्थः । अतः शास्त्रविहितानि कर्माण्यग्निहोत्रादीनि कुर्वन्नेव जिजीविषेत् ॥

1. तै. भा. २-३.
2. शतं समा जिजीविषेदिति न विधीयते, प्राप्तत्वात् । कुर्वन्नेवेति तु विधीयते ॥
3. प्रत्यवायजनकत्वादिलक्षणम् ॥

कथं पुनरिदमवगम्यते पूर्वेण मन्त्रेण संन्यासिनो ज्ञाननिष्ठोक्ता, द्वितीयेन तदशक्तस्य, कर्मनिष्ठेति ? उच्यते । ज्ञानकर्मणोर्विरोधं पर्वतवदकम्प्यं यथोक्तं[1] न स्मरसि किम् ? इहाप्युक्तम् ''यो हि जिजीविषेत् स कर्माणि[2] कुर्वन्नेवेति ।'' ''ईशा वास्यमिदं सर्वं, तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद्धनम्'' इति च । ''न जीविते मरणे वा गृधिं कुर्वीतारण्यमियादिति च पदं ; ततो न पुनरियात् ॥'' (?) इति संन्यासशासनात् । उभयोः फलभेदं च वक्ष्यति[3] । ''इमौ द्वावेव पन्थानावनुनिष्क्रान्ततरौ भवतः क्रियापथश्चैव पुरस्तात् संन्यासश्चोत्तरेण निवृत्तिमार्गेण एषणात्रयस्य त्यागः । तयोः संन्यासपथ एवातिरेचयति'' (?) ''न्यास एवात्यरेचयत्'' (महा. नारा. २१-२) इति च **तैत्तिरीयके** । ''द्वाविमावथ पन्थानौ यत्र वेदाः प्रतिष्ठिताः । प्रवृत्तिलक्षणो धर्मो निवृत्तश्च[4] विभाषितः।'' (मो. २४१-६) इत्यादि पुत्राय विचार्य निश्चितमुक्तं **व्यासेन वेदाचार्येण भगवता** । विभागं चानयोर्दर्शयिष्यामः ॥

---

1. अनेकत्वकर्तृत्वादिलोकबुद्धिसिद्धमुपादाय कर्माणि विहितानि, एकत्वाकर्तृत्वादिज्ञापनार्थं ईशावास्यमित्यादिमन्त्राः प्रवृत्ता इत्युक्तं संबन्धग्रन्थे ॥

2. 'कर्म कुर्वन्' (आ.)

3. 'को मोहः कः शोक' इति विद्याफलं, दशमे ततः परं कर्मफलं च वक्ष्यति ॥

4. 'निवृत्तौ च विभावितः' इति मुम्बापुरीमुद्रिते 'अ ॥' ग्रन्थे ॥

अथेदानीमविद्वन्निन्दार्थोऽयं मन्त्र आरभ्यते --

**असुर्या नाम ते लोका**
**अन्धेन तमसावृताः ।**
**ताँ्स्ते प्रेत्याभिगच्छन्ति**
**ये के चात्महनो जनाः ॥ ३ ॥**

[(ये) अन्धेन तमसा आवृताः, ते असुर्या नाम लोकाः । तान्, ये के च आत्महनो जनाः ते प्रेत्य अभिगच्छन्ति ॥]

**असुर्या इति** । असुर्याः परमात्मभावमद्वयमपेक्ष्य देवादयोऽप्यसुराः, तेषां च स्वभूता लोका असुर्या नाम । नामशब्दोऽनर्थको निपातः । ते लोकाः कर्मफलानि, लोक्यन्ते दृश्यन्ते भुज्यन्ते इति जन्मानि । अन्धेन अदर्शनात्मकेन अज्ञानेन तमसा आवृताः आच्छादिताः । तान् स्थावरान्तान्[1] प्रेत्य-त्यक्त्वेमं देहं अभिगच्छन्ति "यथा कर्म यथा श्रुतम्" (क.२-२-७)। ये के च आत्महनः आत्मानं घ्नन्तीत्यात्महनः । के ते ? जनाः येऽविद्वांसः[2] । कथं ते आत्मानं नित्यं हिंसन्ति ?

---

1. उपासनापूर्वकं धर्माख्यं कर्म देवलोकादिब्रह्मलोकान्तप्राप्तिफलं, केवलं पितृलोकादिप्राप्तिफलं, अधर्ममिश्रितं मनुष्यत्वप्राप्तिफलं, अधर्म-संज्ञकमुपचीयमानं स्थावरान्तप्राप्तिफलम् ; तदेवं ब्रह्मादिस्थावरान्तफलं कर्म ॥

2. अविद्वत्त्वमेव जन्मकारणमिति जनशब्देन सूचितमिति भावः ॥

अविद्यादोषेण विद्यमानस्यात्मनस्तिरस्करणात् । विद्यमानस्य आत्मनो यत्कार्यं फलं अजरामरत्वादिसंवेदनलक्षणं,[1] तद् हतस्येव तिरोभूतं भवतीति प्राकृता अविद्वांसो जना आत्महन इत्युच्यन्ते । तेन ह्यात्महननदोषेण संसरन्ति ते ।।

यस्यात्मनो हननादविद्वांसः संसरन्ति, तद्विपर्ययेण विद्वांसो मुच्यन्तेऽनात्महनः, तत्कीदृशमात्मतत्त्वमिति ? उच्यते -

**अनेजदेकं मनसो जवीयो**
**नैनद्देवा आप्नुवन् पूर्वमर्षत् ।**
**तद्धावतोऽन्यानत्येति तिष्ठत्**
**तस्मिन्नपो मातरिश्वा दधाति ॥ ४ ॥**

[तद् अनेजत्, एकं, मनसो जवीयः । एनत् देवाः न आप्नुवन् पूर्वमर्षत् । तिष्ठत् (सत्) धावतोऽन्यान् अत्येति । तस्मिन् (सति) मातरिश्वा अपः दधाति।।]

**अनेजदिति ।** अनेजत् न एजत् । 'एजृ कम्पने' ; कम्पनं चलनं स्वावस्थाप्रच्युतिः, तद्वर्जितम् । सर्वदा एकरूपमित्यर्थः । तच्च एकं सर्वभूतेषु[2] । मनसः संकल्पादिलक्षणात् जवीयः जववत्तरम् । कथं विरुद्धमुच्यते 'ध्रुवं निश्चलमिदं, मनसो जवीय' इति च ? नैष दोषः, निरुपाध्युपाधिमत्त्वेनोपपत्तेः । तत्र

1. 'संवेदनादि' (वा.)
2. षष्ठो मन्त्रो द्रष्टव्यः ; गी.१३-२७ ; क. २-२-९

निरुपाधिकेन स्वेन रूपेणोच्यते 'अनेजदेकम्' इति ; मनसोऽन्तःकरणस्य संकल्पविकल्पलक्षणस्योपाधेः[1] अनुवर्तनात् इह देहस्थस्य मनसो ब्रह्मलोकादिदूरगमनं[2] संकल्पेन क्षणमात्राद्भवतीत्यतो मनसो जविष्ठत्वं लोके प्रसिद्धम् ; तस्मिन् मनसि ब्रह्मलोकादीन् द्रुतं गच्छति सति प्रथमप्राप्त इवात्मचैतन्याभासो[3] गृह्यते, अतो 'मनसो जवीय' इत्याह ॥

नैनद् देवा द्योतनाद्देवाः[4] चक्षुरादीनीन्द्रियाणि एनत् प्रकृतमात्मतत्त्वं नाप्नुवन् न प्राप्तवन्तः । तेभ्यो मनो जवीयः । मनोव्यापारव्यवहितत्वादाभासमात्रमप्यात्मनो नैव देवानां विषयीभवति ; यस्मात् जवनान्मनसोऽपि पूर्वं अर्षत्[5] पूर्वमेव गतं, व्योमवद्व्यापित्वात् ॥

सर्वव्यापि त ्त्मतत्त्वं सर्वसंसारधर्मवर्जितं स्वेन निरुपाधिकेन स्वरूपेण अविक्रियमेव सत्, उपाधिकृताः सर्वाः संसारविक्रिया अनुभवतीव अविवेकिनां मूढानां अनेकमिव च प्रतिदेहं प्रत्यवभासते[6] इत्येतदाह तद् धावतः द्रुतं गच्छतः

1. अवच्छेद्यवस्तुन्यन्तःप्रविष्ट एव यो व्यावर्तयति स उपाधिः ॥

2. 'ब्रह्मलोकादिदूरस्थसंकल्पनं क्षणमात्राद्भवति' (वा.)

3. कर्तृत्वभोक्तृत्वादियुतो जलसूर्यकादिवत्कल्पितरूपो जीवात्मा चैतन्याभासः ॥ छां. ६-३-२ ; प्र. भा. ४-९ ;

4. तै. भा. २-३ 5. ऋषी गतौ इति धातोः ॥

6. गी. भा. १३-१४, १६.

अन्यान् आत्मविलक्षणान्[1] मनोवागिन्द्रियप्रभृतीन् अत्येति अतीत्य गच्छतीव । इवार्थं स्वयमेव दर्शयति तिष्ठदिति । स्वयमविक्रियम् एव सदित्यर्थः ॥

तस्मिन् आत्मतत्त्वे सति नित्यचैतन्यस्वभावे मातरिश्वा मातरि अन्तरिक्षे श्वयति गच्छतीति मातरिश्वा वायुः ; सर्वप्राणिभृत्क्रियात्मको यदाश्रयाणि कार्यकरणजातानि, यस्मिन् ओतानि प्रोतानि च, यत् सूत्रसंज्ञकं[2] सर्वस्य जगतो विधारयितृ, स मातरिश्वा, अपः[3] कर्माणि प्राणिनां चेष्टालक्षणानि अग्न्यादित्यपर्जन्यादीनां ज्वलनदहनप्रकाशाभिवर्षणादिलक्षणानि दधाति विभजतीत्यर्थः, धारयतीति वा ; "भीषास्माद्वातः पवते" (तै.२-८) इत्यादिश्रुतिभ्यः । सर्वा हि कार्यकरणविक्रिया नित्यचैतन्यात्मस्वरूपे सर्वास्पदभूते सत्येव भवन्तीत्यर्थः ॥

न मन्त्राणां जामितास्तीति[4] पूर्वमन्त्रोक्तमप्यर्थं पुनराह-

**तदेजति तन्नैजति**

**तद्दूरे तद्वन्तिके ।**

---

1. विषयभूतान्, जडात्मकान् ॥
2. बृ. ३-७-२.
3. कर्माण्यग्निहोत्रादीनि सोमाज्यपयःप्रभृतिद्रवद्रव्यव्यपाश्रयाणीत्यतः कर्माण्यप इत्युच्यन्ते वेदे तत्र तत्र ; बृ. भा. ५-५-१.
4. जामिता - सादृश्यं, एकरूपा द्विःक्रिया, पुनरुक्तिदोष इति यावत् ॥ शा. भा. जै. सू. १०-८-६३

**तदन्तरस्य सर्वस्य**

**तदु सर्वस्यास्य बाह्यतः ॥ ५ ॥**

[तद् एजति, तन्नैजति ; तद् दूरे, तदु अन्तिके ; तद् अस्य सर्वस्य अन्तः, तदु अस्य सर्वस्य बाह्यतः ॥]

**तदेजतीति ।** तद् आत्मतत्त्वं यत् प्रकृतं एजति चलति[1]; तदेव च नैजति स्वतो नैव चलति । स्वतोऽचलमेव सत् चलतीवेत्यर्थः ॥

किं च तद्दूरे वर्षकोटिशतैरप्यविदुषामप्राप्यत्वाद् दूरे इव । तद् उ अन्तिके समीपेऽत्यन्तमेव विदुषाम्, आत्मत्वात् । न केवलं दूरे अन्तिके च[2], तद् अन्तः अभ्यन्तरे अस्य सर्वस्य ; "य आत्मा सर्वान्तरः" इति श्रुतेः (बृ.३-४-१) । अस्य सर्वस्य - जगतो नामरूपक्रियात्मकस्य । तद् उ सर्वस्यास्य बाह्यतः, व्यापकत्वात् आकाशवत् ; निरतिशयसूक्ष्मत्वाद्[3] अन्तः ; "प्रज्ञानघन एव" (बृ.४-५-१३) इति शासनात् निरन्तरं[4] च ॥

**यस्तु सर्वाणि भूतानि**

**आत्मन्येवानुपश्यति ।**

**सर्वभूतेषु चात्मानं**

**ततो न विजुगुप्सते ॥ ६ ॥**

1. उपाधिचलनेन चलतीव ॥ 2. मुं. भा. ३-१-७.
3. अतीन्द्रियत्वात् ॥ 4. अखण्डैकरसस्य विच्छेदानुपपत्तेः ॥

[यस्तु सर्वाणि भूतानि आत्मन्येव अनुपश्यति, सर्वभूतेषु च आत्मानं (अनुपश्यति), (स) ततो न विजुगुप्सते ॥]

**यस्तु ।** यः परिव्राट्[1] मुमुक्षुः सर्वाणि भूतानि अव्यक्तादीनि[2] स्थावरान्तानि आत्मन्येव अनुपश्यति आत्मव्यतिरिक्तानि[3] न पश्यतीत्यर्थः । सर्वभूतेषु तेष्वेव च आत्मानं तेषामपि भूतानां स्वमात्मानं आत्मत्वेन 'यथा अस्य देहस्य कार्यकरणसङ्घातस्य आत्मा अहं सर्वप्रत्ययसाक्षिभूतश्चेतयिता[4] केवलो निर्गुणः, अनेनैव स्वरूपेण अव्यक्तादीनां स्थावरान्तानां अहमेव आत्मा' इति सर्वभूतेषु चात्मानं निर्विशेषं यस्त्वनुपश्यति, सः ततः तस्मादेव दर्शनात् न विजुगुप्सते विजुगुप्सां घृणां न करोति ॥

प्राप्तस्यैव अनुवादोऽयम् । सर्वा हि घृणा[5] आत्मनोऽन्यद् दुष्टं पश्यतो भवति ; आत्मानमेव अत्यन्तविशुद्धं निरन्तरं पश्यतो न घृणानिमित्तमर्थान्तरमस्तीति प्राप्तमेव[6] ततो न विजुगुप्सत इति ॥

---

1. एषणात्यागिनो निरभिमानिन एव तत्त्वज्ञानमुदेतीत्यत आह - परिव्राडिति॥
2. अस्य नामरूपकर्मात्मना व्याकृतस्य प्रपञ्चस्य प्रागवस्था, अव्याकृतरूपा अव्यक्तशब्दवाच्या ॥ बृ.भा.१-४-७ ; मुं.भा.२-१-२ ; सू. भा. १-४-२ 3. तै. भा. २-६; गी. भा. ९-४.
4. श्वे.६-११ ; सत्यज्ञानानन्तानन्दपरमात्मरूपेणाहं सर्वस्यात्मेति पश्यतीत्यर्थः ॥ 5. निन्दा ॥
6. अद्वितीयात्मनो द्वेषविषयाभावादेव न विजुगुप्सते इत्युक्तं, न तु सर्वात्मभावदर्शनात् परं निन्दा न भवतीत्यानन्तर्यं ततःशब्देन विवक्षितमिति भावः ॥

इममेवार्थं अन्योऽपि मन्त्र आह --

**यस्मिन् सर्वाणि भूतानि**
**आत्मैवाभूद्विजानतः ।**
**तत्र को मोहः कः शोक**
**एकत्वमनुपश्यतः ॥ ७ ॥**

[यस्मिन् विजानतः सर्वाणि भूतानि आत्मैव अभूत्, तत्र एकत्वं अनुपश्यतः को मोहः, कः शोकः ?]

**यस्मिन् सर्वाणि भूतानि ।** यस्मिन् काले यथोक्तात्मनि वा तान्येव भूतानि सर्वाणि परमार्थात्मदर्शनाद् आत्मैवाभूत् आत्मैव संवृत्तः परमार्थवस्तु विजानतः, तत्र तस्मिन् काले तत्रात्मनि वा को मोहः कः शोकः ? शोकश्च[1] मोहश्च कामकर्मबीजं अजानतो भवति, न त्वात्मैकत्वं विशुद्धं गगनोपमं[2] पश्यतः ॥

'को मोहः कः शोकः ?' इति शोकमोहयोरविद्याकार्ययो-राक्षेपेणासंभवप्रदर्शनात् सकारणस्य संसारस्यात्यन्तमेवोच्छेदः प्रदर्शितो भवति ॥

1. शोकः - इष्टं वस्तूद्दिश्य चिन्तयतो यदरमणं तत्तृष्णाभिभूतस्य कामबीजं ; मोहस्तु विपरीतप्रत्ययप्रभवोऽविवेको भ्रमः ॥ बृ. भा. ३-५-१ ; गी. भा. संबन्धग्रन्थः ॥
2. उ.सा.प. १४-५० (स्वप्नस्मृतिप्रकरणे)

योऽयमतीतैर्मन्त्रैरुक्त आत्मा, स स्वेन रूपेण किंलक्षण इत्याह अयं मन्त्रः -

**स पर्यगाच्छुक्रमकायमव्रणं**
**अस्नाविरꣳ शुद्धमपापविद्धम् ।**
**कविर्मनीषी परिभूः स्वयंभू -**
**र्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः**
**समाभ्यः ॥ ८ ॥**

[स पर्यगात् । शुक्रं, अकायं, अव्रणं, अस्नाविरं, शुद्धं, अपापविद्धम् । कविः, मनीषी, परिभूः, स्वयंभूः । शाश्वतीभ्यः समाभ्यः याथातथ्यतः अर्थान् व्यदधात् ॥]

**स पर्यगात् ।** सः यथोक्त आत्मा पर्यगात् परि समन्तात् अगात् गतवान् ; आकाशवद् व्यापीत्यर्थः ।शुक्रं शुभ्रं, ज्योतिष्मत् ; दीप्तिमानित्यर्थः । अकायं अशरीरं ; **लिङ्गशरीर-वर्जित** इत्यर्थः । अव्रणम् अक्षतम् । अस्नाविरं स्नावाः सिराः[1] यस्मिन् न विद्यन्त इत्यस्नाविरम् । 'अव्रणमस्नाविरं' इत्येताभ्यां **स्थूलशरीर**प्रतिषेधः । शुद्धंनिर्मलं, अविद्यामलरहितमिति **कारणशरीर**प्रतिषेधः । अपापविद्धं धर्माधर्मादिपापवर्जितम् । 'शुक्रम्' इत्यादीनि वचांसि पुल्लिङ्गत्वेन परिणेयानि[2], 'स

1. सिराः - नाड्यः ।
2. 'शुक्रः, अकायः, अव्रणः, अस्नाविरः, शुद्धः, अपापविद्धः' - इत्येवं लिङ्गविपरिणामः कर्तव्य इति भावः ॥

पर्यगात्' इत्युपक्रम्य 'कविर्मनीषी' इत्यादिना पुल्लिङ्गत्वेनोपसंहारात् । कविः क्रान्तदर्शी[1] सर्वदृक्, 'नान्योऽतोऽस्ति द्रष्टा' (बृ.३-७-२३) इत्यादिश्रुतेः । मनीषी मनस[2] ईशिता सर्वज्ञ ईश्वर इत्यर्थः । परिभूः सर्वेषां परि उपरि भवतीति परिभूः । स्वयंभूः स्वयमेव भवतीति ; येषाम् उपरि भवति यश्चोपरि भवति स सर्वः स्वयमेव भवतीति स्वयंभूः । स नित्यमुक्त ईश्वरो याथातथ्यतः सर्वज्ञत्वात्; यथातथाभावो याथातथ्यं, तस्मात्, यथाभूतकर्मफलसाधनतः[3], अर्थान् कर्तव्यपदार्थान् व्यदधात् विहितवान्, यथानुरूपं व्यभजदित्यर्थः । शाश्वतीभ्यः[4] नित्याभ्यः समाभ्यः संवत्सराख्येभ्यः प्रजापतिभ्य इत्यर्थः ॥

अत्राद्येन मन्त्रेण सर्वैषणापरित्यागेन ज्ञाननिष्ठोक्ता प्रथमो वेदार्थः - ''ईशावास्यमिदं सर्वं ...... मा गृधः कस्यस्विद्धनम्' (१) इति । अज्ञानां जिजीविषूणां ज्ञाननिष्ठासंभवे ''कुर्वन्नेवेह कर्माणि जिजीविषेत्'' (२) इति कर्मनिष्ठोक्ता द्वितीयो वेदार्थः । अनयोश्च निष्ठयोर्विभागो मन्त्रद्वयप्रदर्शितयोर्बृहदारण्यकेऽपि प्रदर्शितः - ''सोऽकामयत जाया मे स्यात्'' (बृ.१-४-१७) इत्यादिना अज्ञस्य कामिनः कर्माणीति । ''मन एवास्यात्मा

1. इन्द्रियमतिक्रान्तस्य भूतभविष्यत्कालगस्यापि द्रष्टा ॥
2. मननादिव्यापारनियन्ता, मनसोऽपि साक्षीत्यर्थः ॥
3. अस्य कर्मण इदं फलं निश्चितं भवितेति नियमगोचरत्वमेव याथातथ्यं, न पुनः परमार्थसत्यता ॥
4. प्रजापतित्वं तत्तत्कल्पान्तस्थायीत्यत उक्तं 'शाश्वतीभ्य' इति ॥

वाग्जाया'' (बृ.१-४-१७) इत्यादिवचनादज्ञत्वं[1] कामित्वं च कर्मनिष्ठस्य निश्चितमवगम्यते । तथा च तत्फलं सप्तान्नसर्गः[2] (बृ.१-५-२) तेष्वात्मभावेनात्मस्वरूपावस्थानम्[3] । जाया-द्येषणात्रयसंन्यासेन चात्मविदां कर्मनिष्ठाप्रातिकूल्येन आत्मस्वरूपनिष्ठैव दर्शिता- ''किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोकः'' (बृ.४-४-२२) इत्यादिना ॥

ये तु ज्ञाननिष्ठाः संन्यासिनः, तेभ्यः ''असुर्या नाम ते'' (३) इत्यादिना अविद्वन्निन्दाद्वारेण आत्मनो याथात्म्यं ''स पर्यगात्'' (८) इत्येतदन्तैर्मन्त्रैरुपदिष्टम् ; ते ह्यत्राधिकृता न कामिन इति । तथा च श्वेताश्वतराणां मन्त्रोपनिषदि - ''अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच सम्यगृषिसङ्घजुष्टम्'' (श्वे.६-२१) इत्यादि विभज्योक्तम्[4] । ये तु कामिनः कर्मनिष्ठाः

1. अनेन वचनेन बाह्यजायाद्यप्राप्त्या आत्मानमकृत्स्नं मन्यमानस्य कृत्स्नतासंपादनार्थं अध्यात्मजायादिसंपत्तिर्निर्दिश्यते । अतः कर्मनिष्ठोऽज्ञः, मनआदिष्वात्मत्वाद्यभिमानवत्त्वात् ॥
2. एकं साधारणमन्नं यदिदमद्यते, द्वे देवानां दर्शपूर्णमासौ, त्रीण्यात्मार्थं भोगसाधनानि मनोवाक्प्राणलक्षणानि, पश्वर्थमेकं तत्पयः- इति सप्तान्नसृष्टिः कर्मफलम् ॥
3. तेष्वहंममाभिमानः ॥
4. कामिभ्यः कर्माधिकारिभ्यो विभज्य अत्याश्रमिणां संन्यासिनां एवात्र विद्यायां अधिकार इत्युक्तम् ॥

कर्म कुर्वन्तः एव जिजीविषवः, तेभ्य इदमुच्यते - ''अन्धं तमः'' (९) इत्यादि ॥

कथं पुनरेवमवगम्यते, न तु सर्वेषामिति ? उच्यते । अकामिनः साध्यसाधनभेदोपमर्देन ''यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः । तत्र को मोहः कः शोक एकत्वमनुपश्यतः'' (७) इति यदात्मैकत्वविज्ञानं, तन्न केनचित्कर्मणा ज्ञानान्तरेण[1] वा ह्यमूढः समुच्चिचीषति[2] । इह तु समुच्चिचीषया अविद्वदादिनिन्दा क्रियते । तत्र च यस्य येन समुच्चयः संभवति न्यायतः शास्त्रतो वा तदिहोच्यते, यद् दैवं वित्तं[3] देवताविषयं ज्ञानं कर्मसम्बन्धित्वेनोपन्यस्तं न परमात्मज्ञानं, ''विद्यया देवलोकः'' (बृ.१-५-१६) इति पृथक्फलश्रवणात्[4] । तयोर्ज्ञानकर्मणोरिहैकैकानुष्ठाननिन्दा समुच्चिचीषया, न निन्दापरैव, एकैकस्य पृथक्फलश्रवणात्[5] ''विद्यया तदारोहन्ति''[6] (शत.१०-५-४-१६), ''विद्यया देवलोकः'' (बृ.१-५-१६), 'न तत्र दक्षिणा यन्ति''[6] (शत.१०-५-४-१६), ''कर्मणा पितृलोकः''

1. उपासनेन वा, तस्यापि मानसकर्मत्वात् ॥
2. समुच्चित्यानुष्ठातुमिच्छति ॥
3. मानुषं वित्तं कर्म, दैवं वित्तं देवतोपासनम् ; बृ.भा.१-४-१७
4. देवतोपासनारूपस्य फलं मोक्षादन्यदेव देवलोकलक्षणं पृथक् श्रूयते ॥
5. न हि फलवद्विधीयते श्रुत्या, तदेव निन्द्यते च इति युक्तम् ॥
6. ''विद्यया तदारोहन्ति यत्र कामाः परागताः । न तत्र दक्षिणा यन्ति नाविद्वांसस्तपस्विनः ॥'' इति पूर्णं वचनम् ॥

(बृ.१-५-१६) इति । न हि शास्त्रविहितं[1] किंचिदकर्तव्यतामियात् ॥

तत्र-

**अन्धं तमः प्रविशन्ति**
**येऽविद्यामुपासते ।**
**ततो भूय इव ते**
**तमो य उ विद्यायाꣳ रताः ॥ ९ ॥**

[ये अविद्यां उपासते, (ते) अन्धं तमः प्रविशन्ति । य उ विद्यायां रताः, ते ततो भूय इव तमः (प्रविशन्ति) ॥]

**अन्धं तम** । अदर्शनात्मकं तमः प्रविशन्ति । के ? ये अविद्यां विद्याया अन्या अविद्या, कर्मेत्यर्थः ; कर्मणो विद्याविरोधित्वात्[2], तां अविद्यां अग्निहोत्रादिलक्षणामेव केवलां उपासते तत्पराः सन्तोऽनुतिष्ठन्तीत्यभिप्रायः । ततः तस्माद् अन्धात्मकात् तमसः भूय इव बहुतरमेव ते तमः[3] प्रविशन्ति । के ? कर्म हित्वा ये उ ये तु विद्यायामेव देवताज्ञाने एव रताः अभिरताः ॥

---

1. विहितस्य अकर्तव्यत्वे, न किञ्चित् शास्त्रीयं कर्म कर्तव्यं इति प्रसज्येत ॥
2. कर्तृत्वबुद्धियुक्तस्य कर्म, अकर्तृत्वबुद्धियुक्तस्य च ज्ञानमिति स्फुटो विरोधः ; तस्माद् विरोधार्थे नञिति भावः ॥
3. अहंममाभिमानरूपम् ॥

तत्रावान्तरफलभेदं विद्याकर्मणोः समुच्चयकारणमाह ; अन्यथा फलवदफलवतोः सन्निहितयोरङ्गाङ्गितया[1] जामितैव[2] स्यादिति -

अन्यदेवाहुर्विद्यया
अन्यदाहुरविद्यया ।
इति शुश्रुम धीराणां
ये नस्तद्विचचक्षिरे ॥ १० ॥

[विद्यया अन्यद् एव (फलं) आहुः, अविद्यया अन्यत् (फलं) आहुः । इति धीराणां वचनं शुश्रुम, ये नः तद् विचचक्षिरे ॥]

**अन्यदेवेति** । अन्यत् पृथगेव विद्यया क्रियते फलमिति आहुः वदन्ति "विद्यया देवलोकः" (बृ.१-५-१६), "विद्यया तदारोहन्ति" (शत.१०-५-४-१६) इति श्रुतेः । अन्यद् आहुः अविद्यया कर्मणा क्रियते फलमिति । "कर्मणा पितृलोकः" (बृ.१-५-१६) इति श्रुतेः[3] । इति एवं शुश्रुम श्रुतवन्तो वयं धीराणां धीमतां वचनं, ये आचार्याः नः अस्मभ्यं तत् कर्म च

1. 'अङ्गाङ्गितैव स्यात्' (आ.)
2. अङ्गाङ्गित्वेनैव समुच्चयः सिद्धः, अङ्गविहीनस्य फलाधायकत्वाभावात् ; तस्मादङ्गाङ्गिनोः समुच्चयोऽर्थसिद्ध इति तस्यैव विधाने पुनरुक्तिः स्यादिति भावः ॥
3. "आहुः - वदन्ति, अन्यदाहुरविद्यया कर्मणा क्रियते फलमिति । तथोक्तम् - 'कर्मणा पितृलोकः, विद्यया देवलोकः' " (आ.)

ज्ञानं च विचचक्षिरे व्याख्यातवन्तः, तेषाम् । अयमागमः[1] पारम्पर्यागत इत्यर्थः ॥

यत एवं[2] अतः -

**विद्यां चाविद्यां च**
**यस्तद्वेदोभयꣳ सह ।**
**अविद्यया मृत्युं तीर्त्वा**
**विद्ययामृतमश्नुते ॥ ११ ॥**

[यः विद्यां च अविद्यां च तद् उभयं सह वेद, (सः) अविद्यया मृत्युं तीर्त्वा विद्यया अमृतं अश्नुते ॥]

**विद्यां चेति** । विद्यां चाविद्यां च देवताज्ञानं कर्म च इत्यर्थः । यः तद् एतदुभयं सह एकेन पुरुषेण अनुष्ठेयं[3] वेद ; तस्यैवं समुच्चयकारिण एव एकपुरुषार्थसंबन्धः[4] क्रमेण स्यादित्युच्यते । अविद्यया कर्मणा अग्निहोत्रादिना मृत्युं स्वाभाविकं[5] कर्म ज्ञानं च मृत्युशब्दवाच्यमुभयं तीर्त्वा अतिक्रम्य विद्यया देवताज्ञानेन अमृतं देवतात्मभावं अश्नुते प्राप्नोति । तद्धि अमृतत्वमुच्यते[6], यद्देवतात्मगमनम् ॥

1. उपदेशः ॥ 2. कर्माकर्मणोः पृथक्फलवत्त्वात् ॥
3. युगपदित्यर्थः । अस्यार्थः माण्डूक्यकारिकादिभाष्यान्तरेऽन्यथैव वर्णितो दृश्यते ; परिशिष्टे द्रष्टव्यम् ॥
4. 'एकैकपुरुषार्थसंबन्धः' (वा.) 5. अशास्त्रविहितम् ।
6. तदपि देवतात्मगमनं बहुकालस्थायित्वादमृतमुच्यते गौण्या वृत्त्या ॥

अधुना व्याकृताव्याकृतोपासनयोः समुच्चिचीषया प्रत्येकं निन्दोच्यते-

**अन्धं तमः प्रविशन्ति**
**येऽसंभूतिमुपासते ।**
**ततो भूय इव ते**
**तमो य उ संभूत्याꣳ रताः ॥ १२ ॥**

[ये असंभूतिं उपासते, (ते) अन्धं तमः प्रविशन्ति । ये उ संभूत्यां रताः ते ततो भूयः इव तमः (प्रविशन्ति) ॥]

अन्धं तमः प्रविशन्ति ये । असंभूतिं संभवनं संभूतिः, सा यस्य कार्यस्य सा संभूतिः; तस्या अन्या असंभूतिः, प्रकृतिः, कारणं अविद्या, अव्याकृताख्या[1]; तां असंभूतिं अव्याकृताख्यां प्रकृतिं कारणं अविद्यां कामकर्मबीजभूतां[2] अदर्शनात्मिकां उपासते ये, ते तदनुरूपमेव अन्धं तमः अदर्शनात्मकं प्रविशन्ति । ततः तस्मादपि भूयः बहुतरमिव तमः प्रविशन्ति ये उ संभूत्यां **कार्यब्रह्मणि हिरण्यगर्भाख्ये**[3] रताः ॥

---

1. व्याकृतं साध्यसाधनरूपेण व्यक्तं जगत् ; अव्याकृतं तथानभिव्यक्तं प्रागवस्थम् । तच्च अविद्याकल्पितमिति अविद्येत्युच्यते ॥
2. अविद्यैव हि कामकर्मणोर्मूलम् । अव्याकृतस्याविद्यात्मकस्याभावे न व्याकृतं जगत्, तदभावे न कामकर्मणीति कामकर्मणोर्बीजमव्याकृतम् ॥
3. मुं. भा. १-१-८.

अधुना उभयोरुपासनयोः समुच्चयकारणमवयवफलभेदमाह-[1]

**अन्यदेवाहुः संभवा-**
**दन्यदाहुरसंभवात् ।**
**इति शुश्रुम धीराणां**
**ये नस्तद्विचचक्षिरे ॥ १३ ॥**

[संभवाद् अन्यद् एव (फलं) आहुः, असंभवाद् अन्यद् आहुः । इति धीराणां (वचनं) शुश्रुम, ये नः तद् विचचक्षिरे ॥]

**अन्यदेवेति** । अन्यदेव पृथगेव आहुः फलं संभवात् संभूतेः, कार्यब्रह्मोपासनात्, अणिमाद्यैश्वर्यलक्षणं व्याख्यातवन्त इत्यर्थः । तथा च अन्यद् आहुः असंभवात् असंभूतेः अव्याकृतोपासनात् । यदुक्तं "अन्धं तमः प्रविशन्ति" (९) इति । **प्रकृतिलय** इति च पौराणिकैरुच्यते[2] । इति एवं शुश्रुम धीराणां वचनं, ये नः तद् विचचक्षिरे व्याकृताव्याकृतोपासनफलं व्याख्यातवन्त इत्यर्थः ॥

यत एवं, अतः समुच्चयः संभूत्यसंभूत्युपासनयोर्युक्त एव, एकपुरुषार्थत्वाच्चेत्याह[3] -

---

1. दशममन्त्रावतरणिका द्रष्टव्या ॥
2. वि. पु. १-७-४२ ; सांसारिकदुःखानुभवाभावेन सुषुप्तिवत्प्रकृतिलयस्यापि पुरुषेणार्थ्यमानत्वमुपपद्यते ॥ 3. 'एकैकपुरुषार्थत्वाच्च' (बा.)

**संभूतिं च विनाशं च**
**यस्तद्वेदोभयᳪ सह ।**
**विनाशेन मृत्युं तीर्त्वाऽ-**
**संभूत्यामृतमश्नुते ॥ १४ ॥**

[यः संभूतिं च विनाशं च उभयं सह वेद, (सः) विनाशेन मृत्युं तीर्त्वा असंभूत्या अमृतं अश्नुते ॥]

**संभूतिं चेति ।** संभूतिं च विनाशं च यस्तद्वेद उभयं सह[1], विनाशेन विनाशो धर्मो यस्य कार्यस्य स तेन धर्मिणा अभेदेनोच्यते 'विनाश' इति । तेन तदुपासनेन अनैश्वर्यं अधर्म-कामादिदोषजातं च मृत्युं तीर्त्वा ; हिरण्यगर्भोपासनेन हि अणिमादिप्राप्तिः फलं, तेन अनैश्वर्यादि मृत्युं अतीत्य; असंभूत्या अव्याकृतोपासनया अमृतं प्रकृतिलयलक्षणं अश्नुते । "संभूतिं च विनाशं च" इत्यत्र अवर्णलोपेन[2] निर्देशो द्रष्टव्यः, प्रकृतिलयफलश्रुत्यनुरोधात्[3] ॥

मानुषदैववित्तसाध्यं[4] फलं शास्त्रलक्षणं प्रकृतिलयान्तम् । एतावती संसारगतिः । अतः परं पूर्वोक्तं "आत्मैवाभूद्विजानतः"

1. युगपत् समुच्चित्य ।
2. 'असंभूतिं च विनाशं च' इत्येवं द्रष्टव्यः ।
3. असंभूत्या अमृतमश्नुते - इति प्रकृतिलयप्राप्तिः श्रुता ; तदन्यथानुपपत्तिः प्रमाणं अवर्णलोपेन निर्देश इत्यत्र ॥
4. बृ. १-४-१७ ॥

(७) इति **सर्वात्मभाव** एव सर्वैषणासंन्यासज्ञाननिष्ठाफलम्[1] । एवं द्विप्रकारः **प्रवृत्तिनिवृत्तिलक्षणो**[2] वेदार्थोऽत्र प्रकाशितः । तत्र प्रवृत्तिलक्षणस्य वेदार्थस्य विधिप्रतिषेधलक्षणस्य कृत्स्नस्य प्रकाशने **प्रवर्ग्यान्तं** ब्राह्मणं उपयुक्तम् ;- निवृत्तिलक्षणस्य प्रकाशने अत ऊर्ध्वं **बृहदारण्यकं** उपयुक्तम् । तत्र निषेकादिश्मशानान्तं कर्म कुर्वन् जिजीविषेद् यो विद्यया सह अपरब्रह्मविषयया[3], तदुक्तम् - ''विद्यां चाविद्यां च यस्तद्वेदोभयं सह । अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते'' (११) इति । तत्र केन मार्गेण अमृतत्वमश्नुत इति ? उच्यते —

**हिरण्मयेन पात्रेण**
**सत्यस्यापिहितं मुखम् ।**
**तत्त्वं पूषन्नपावृणु**
**सत्यधर्माय दृष्टये ॥ १५ ॥**

[पूषन्, हिरण्मयेन पात्रेण सत्यस्य मुखं आपेहितम् । तत् त्वं सत्यधर्माय (मह्यम्) दृष्टये अपावृणु ॥]

---

1. सर्वैषणासंन्यासेन ज्ञाननिष्ठायाः फलमित्युपचर्यते सर्वात्मभावः, नित्यसिद्धत्वेऽपि ज्ञानं विना तदापरोक्ष्यफलाभावात् ॥
2. एकोनचत्वारिंशाध्यायसमाप्तिपर्यन्तं कर्म प्रतिपादितम् ; चत्वारिंशेत्वत्र कर्म च ज्ञानं च प्रतिपाद्यते ॥
3. सू. भा. ४-३-९; ४-३-१४.

"तद्यत्तत् सत्यमसौ स आदित्यो य एष एतस्मिन् मण्डले पुरुषो, यश्चायं दक्षिणेऽक्षन् पुरुषः" (बृ.५-५-२) - एतदुभयं[1] सत्यं ब्रह्मोपासीनो यथोक्तकर्मकृच्च यः, सोऽन्तकाले प्राप्ते सत्यात्मानं आत्मनः प्राप्तिद्वारं याचते[2] **हिरण्मयेन पात्रेण ॥** हिरण्मयमिव हिरण्मयं, ज्योतिर्मयमित्येतत्; तेन पात्रेणेव अपिधानभूतेन सत्यस्य आदित्यमण्डलस्थस्य ब्रह्मणः अपिहितं[3] आच्छादितं मुखं द्वारम् । तत् त्वं हे पूषन्, अपावृणु अपसारय सत्यधर्माय तव सत्यस्य उपासनात्, सत्यं धर्मो यस्य सोऽहं सत्यधर्मा; तस्मै मह्यम् ; अथवा यथाभूतस्य धर्मस्य अनुष्ठात्रे । दृष्टये तव सत्यात्मन उपलब्धये ॥

**पूषन्नेकर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन् ।**
**समूह तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि ।**
**योऽसावसौ पुरुषः सोऽहमस्मि ॥ १६ ॥**

[पूषन्, एकर्षे, यम, सूर्य, प्राजापत्य, रश्मीन् व्यूह; तेजः समूह ; यत्ते कल्याणतमं रूपं, तत् ते पश्यामि । योऽसौ असौ पुरुषः सोऽहमस्मि ॥]

---

1. अध्यात्माधिदैवतरूपम् ।
2. ज्ञानकर्मसमुच्चयफलप्राप्त्यर्थं देवयानं प्रार्थयते ॥
3. सत्याख्यं ब्रह्म ज्योतिर्मयेन मण्डलेन अपिहितमिव, असमाहित-चेतसामदृश्यत्वात् ; बृ. भा. ५-१५-१.

**पूषन्निति।** हे पूषन्--जगतः पोषणात् पूषा रविः। तथा एक एव ऋषति[1] गच्छतीति एकर्षिः, हे एकर्षे ; तथा सर्वस्य संयमनाद्[2] यमः, हे यम; तथा रश्मीनां प्राणानां रसानां च स्वीकरणात्[3] सूर्यः, हे सूर्य; प्रजापतेरपत्यं-प्राजापत्यः, हे प्राजापत्य। व्यूह विगमय[4] रश्मीन् स्वान्। समूह एकीकुरु, उपसंहर ते तेजः तावकं ज्योतिः। यत् ते तव रूपं कल्याणतमं अत्यन्तशोभनं तत् ते तवात्मनः प्रसादात् पश्यामि। किं च अहं न तु त्वां भृत्यवद् याचे, योऽसौ आदित्यमण्डलस्थः असौ व्याहृत्यवयवः[5] पुरुषः पुरुषाकारत्वात्[6], पूर्णं[7] वा अनेन प्राणबुद्ध्यात्मना जगत् समस्तमिति पुरुषः ; पुरि[8] शयनाद्वा पुरुषः। सः अहं अस्मि भवामि॥

वायुरनिलममृत-
मथेदं भस्मान्तँ शरीरम्।
ॐ क्रतो स्मर कृतँ स्मर
क्रतो स्मर कृतँ स्मर ॥ १७॥

---

1. ऋषी-गतौ. 2. यम-उपरमे.
3. सुष्ठु वीरयते इति - सूर्यः; वीर-विक्रान्तौ। 4. वह-प्रापणे।
5. भूरिति शिरः, भुव इति बाहू, स्वरिति प्रतिष्ठा; बृ.५-५-३, ४.
6. शिरःपाण्यादिलक्षणत्वात् (बृ.भा.१-४-१)
7. प्र.भा. ५-५ ; मुं.भा.१-१-८.
8. पुरि-शरीरे ; बृ. २-५-१८.

[वायुः अमृतं अनिलं (गच्छतु) । अथ इदं शरीरं भस्मान्तं (भूयात्) । ॐ क्रतो स्मर, कृतं स्मर; क्रतो स्मर, कृतं स्मर ॥]

**वायुरिति** ·। अथेदानीं मम मरिष्यतो वायुः प्राणः अध्यात्मपरिच्छेदं हित्वा अधिदैवतात्मानं सर्वात्मकं अनिलं अमृतं सूत्रात्मानं 'प्रतिपद्यताम्' इति वाक्यशेषः । 'लिङ्गं चेदं ज्ञानकर्मसंस्कृतं उत्क्रामतु' इति द्रष्टव्यं[1], मार्गयाचनसामर्थ्यात्[2] । अथ इदं शरीरं अग्नौ हुतं भस्मान्तं भूयात् । 'ॐ' इति यथोपासनं ओंप्रतीकात्मकत्वात्[3] सत्यात्मकं अग्न्याख्यं ब्रह्म अभेदेनोच्यते । हे क्रतो सङ्कल्पात्मक[4] स्मर यन्मम स्मर्तव्यम् । तस्य कालोऽयं प्रत्युपस्थितः, अतः स्मर एतावन्तं कालं भावितम् । कृतं अग्ने स्मर यन्मया बाल्यप्रभृत्यनुष्ठितं कर्म तच्च स्मर । "क्रतो स्मर कृतं स्मर" इति पुनर्वचनं आदरार्थम् ॥

पुनरन्येन मन्त्रेण मार्गं याचते -

**अग्ने नय सुपथा राये अस्मान्**
**विश्वानि देव वयुनानि विद्वान् ।**

---

1. अध्याहारः कर्तव्यः ॥
2. न हि कर्मोपासनासमुच्चयकारिणो ज्ञानिवदिहैव ब्रह्मप्राप्तिः संभवति ; अत एवात्र मार्गयाचनं श्रूयत इति भावः ॥
3. प्रणव एव अग्न्याख्यं ब्रह्म-इत्यब्रह्मापि सन् ब्रह्मत्वेनोपास्य ओंकारः; अत ओंप्रतीकं ब्रह्म ॥
4. मनसि व्यवस्थितत्वात् अग्निदेवतायाः क्रतो इति संबोधनम् ; बृ.भा.५-५-१.

युयोध्यस्मज्जुहुराणमेनो
भूयिष्ठां ते नमउक्तिं विधेम ॥ १८ ॥

[अग्ने, देव, विश्वानि वयुनानि विद्वान्, सुपथा राये अस्मान् नय ; जुहुराणं एनः अस्मद् युयोधि ; ते भूयिष्ठां नमउक्तिं विधेम ॥]

**अग्ने नयेति** । हे अग्ने, नय गमय सुपथा शोभनेन मार्गेण । सुपथा इति विशेषणं **दक्षिणमार्गनिवृत्त्यर्थम्** । निर्विण्णोऽहं दक्षिणेन मार्गेण गतागतलक्षणेन[1] ; अतो याचे त्वां पुनः पुनर्गमनागमनवर्जितेन शोभनेन पथा नय । राये धनाय, कर्मफलभोगायेत्यर्थः । अस्मान् यथोक्तधर्मफलविशिष्टान् विश्वानि सर्वाणि हे देव, वयुनानि कर्माणि प्रज्ञानानि वा, विद्वान् जानन् । किं च युयोधि वियोजय[2] विनाशय, अस्मत् अस्मत्तः जुहुराणं कुटिलं वञ्चनात्मकं, एनः पापम् । ततो वयं विशुद्धाः सन्तः इष्टं प्राप्स्याम इत्यभिप्रायः । किं तु वयमिदानीं ते न शक्नुमः परिचर्यां कर्तुम् ; भूयिष्ठां बहुतरां ते तुभ्यं नमउक्तिं नमस्कारवचनं विधेम नमस्कारेण परिचरेम इत्यर्थः ॥

1. गी.९-२१ ; पुनरावृत्तिरहितेन शुक्लेनैव उत्तरेण पथा नयेत्यर्थः ॥
2. छान्दसं रूपं 'युयोधि' इति ; यु-मिश्रणामिश्रणयोरिति धातोः ॥

## अथ भाष्यकृतां समुच्चये विचारः

"अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते" (११), "विनाशेन मृत्युं तीर्त्वा संभूत्यामृतमश्नुते" - इति श्रुत्वा केचित् संशयं कुर्वन्ति । अतस्तन्निराकरणार्थं[1] संक्षेपतो विचारणां करिष्यामः ॥

तत्र तावत् किंनिमित्तः संशय इति ? उच्यते । विद्याशब्देन मुख्या परमात्मविद्यैव कस्मान्न गृह्यते, अमृतत्वं च[2] ? ननु - उक्तायाः परमात्मविद्यायाः कर्मणश्च विरोधात् समुच्चयानुपपत्तिः । सत्यम् । विरोधस्तु नावगम्यते, विरोधाविरोधयोः शास्त्रप्रमाणकत्वात् । यथा अविद्यानुष्ठानं[3] विद्योपासनं च शास्त्रप्रमाणकं, तथा तद्विरोधाविरोधावपि । यथा च "न हिंस्यात् सर्वा भूतानि" (?) इति शास्त्रादवगतं पुनः शास्त्रेणैव बाध्यते "अध्वरे पशुं हिंस्यात्"[4] (?) इति, एवं विद्याविद्ययोरपि स्यात् । विद्याकर्मणोश्च समुच्चयः ॥

---

1. 'तन्निर्धारणार्थं' (वा.)
2. मुख्यमेव कैवल्यलक्षणं कस्मान्न गृह्यते ?
3. कर्मानुष्ठानं शास्त्रविहितं, विद्या च शास्त्रविहिता ।
4. अध्वरे पशुं हिंस्यादिति विशेषवचनेनैव 'न हिंस्यात्' इति सामान्यवचनं यथा बाध्यते एवं विद्याविद्याविरोधः समुच्चयो वा यथावचनमेव ग्राह्यः ; अस्ति चात्र समुच्चयो विहितः, अतस्त्याज्या विरोधाशङ्का इति पूर्वपक्ष्यभिप्रायः ॥

न, "दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाता" (क.१-२-४) इति श्रुतेः। "विद्यां चाविद्यां च" (११) इति वचनाद् अविरोध इति चेत्; न, हेतुस्वरूपफलविरोधात्[1]। विद्याविद्याविरोधाविरोधयोर्विकल्पासंभवात्[2]। समुच्चयविधानादविरोध एवेति चेत्; न, सहसंभवानुपपत्तेः[3]। क्रमेण एकाश्रये स्यातां विद्याविद्ये इति चेत्; न, विद्योत्पत्तौ[4] अविद्याया ह्यस्तत्वात् तदाश्रये अविद्यानुपपत्तेः। न हि 'अग्निरुष्णः प्रकाशश्च' इति विज्ञानोत्पत्तौ यस्मिन् आश्रये तदुत्पन्नं, तस्मिन्नेव आश्रये 'शीतोऽग्निरप्रकाशो वा' इत्यविद्याया उत्पत्तिः, नापि संशयोऽज्ञानं[5] वा। "यस्मिन् सर्वाणि भूतानि आत्मैवाभूद्विजानतः। तत्र को

1. चोदनारूपविधिर्हेतुः कर्मज्ञाने, केवलवस्तुप्रतिपादकं वचनं हेतुर्ज्ञाने; अनुष्ठानापेक्षं कर्मज्ञानं, तदनपेक्षमात्मज्ञानं; साध्यफलं कर्मज्ञानं, सिद्धफलं आत्मज्ञानम् - इत्येवं हेतुस्वरूपफलविरोधः, सू. भा.१-१-१.
2. अतिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णातीत्यादिवत् एकत्रैव विरोध- अविरोधश्चेति विकल्पासंभवात्; सू. भा.१-१-२.
3. विरोधस्य स्फुटत्वात्, अविरोधस्य वचनबलादेवाश्रयणीयत्वात्, शब्दस्यापि विरुद्धार्थप्रत्यायने असामर्थ्यात् विरोध एव विद्याविद्ययोरवसेयः। परमात्मविद्याकर्मणोः समुच्चयसिद्धौ अविरुद्धत्वसिद्धिः, अविरुद्धत्वसिद्धौ च समुच्चयसिद्धिरित्यन्योन्याश्रयश्च पूर्वपक्षिमते॥
4. पूर्वं अविद्याशब्दितं कर्म, पश्चाच्च विद्येति क्रम इष्ट एव; विद्यासमनन्तरं अविद्येति तु न घटते, अविद्याया अत्यन्तं बाधादिति भावः॥
5. विपरीतज्ञानं, संशयो, ज्ञानाभावो वा अविद्या। त्रिविधाया अपि विद्यायाः पश्चादसंभवः॥

मोहः कः शोक एकत्वमनुपश्यतः'' (७) इति शोकमोहाद्यसंभवश्रुतेः अविद्याऽसंभवात् तदुपादानस्य कर्मणोऽप्यनुपपत्तिमवोचाम । ''अमृतमश्नुते'' (११, १४) इत्यापेक्षिकममृतम्[1] ; विद्याशब्देन परमात्मविद्याग्रहणे ''हिरण्मयेन'' (१५) इत्यादिना द्वारमार्गादियाचनं अनुपपन्नं[2] स्यात् । तस्माद् यथाव्याख्यात एव मन्त्राणामर्थ इत्युपरम्यते ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ
ईशावास्योपनिषद्भाष्यं संपूर्णम् ॥

**ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।**
**पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥**
**ॐ शान्तिः शान्तिः शान्तिः ॥**

इतीशावास्योपनिषत् संपूर्णा

--------

1. बहुकालस्थायित्वात् तस्याप्यमृतशब्दगोचरत्वोपपत्तेः ।
2. परमात्मविद्यावतः सद्योमुक्तिभाक्त्वाद् गत्युत्क्रान्त्योरभावात् ; सू. भा. ४-२-७,२७ ; बृ. भा.४-४-६.

## ईशावास्योपनिषत्सारः

(मन्त्राः१-३.) अस्यां जगत्यां यदिदं स्थावरजङ्गमात्मकं दरीदृश्यते तत्सर्वं आत्मैव । आत्मयाथात्म्यविदः सर्वैषणापरित्यागेन आत्मज्ञाननिष्ठायामेवाधिकारः । आत्मग्रहणाशक्तस्य तु शास्त्रीयविधिनिषेधलक्षणकर्मानुष्ठानेन तन्निष्ठायामधिकारः । वस्तुतस्तु ये केचनात्मतत्त्वज्ञानहीनाः, ते सर्वेऽपि असुरस्थानीयाः । यतस्ते अज्ञानावृता आत्महत्यादोषेण सततं रागद्वेषयुताः संसरन्ति ॥

(४-८.) तदेतदात्मतत्त्वं स्वेन निरुपाधिकेन रूपेण एकं देहेन्द्रियमनोभिरसम्बद्धं च सत्, अनेकमिव, उपाधिकृताः संसारविक्रिया अनुभवतीव च, मूढानां प्रत्यवभासते । यस्तु ज्ञानी सर्वभूतेषु स्वमेवैकमात्मानम् अशरीरं धर्माधर्माद्यगोचरं परमार्थसत्यं पश्यति तद्व्यतिरिक्तं न किंचिदपि सत्यमिति च, स शोकमोहादिभिः सकलैरविद्याकृतैः संसारधर्मैर्विमुक्तो भवति ॥

(९-१४.) कर्मोपासनयोः समुच्चित्यानुष्ठानेन तयोः पृथगनुष्ठानफलापेक्षया प्रशस्यतरं फलं भवति । तत्र समुच्चयोपासकः कर्मणा स्वाभाविककर्मज्ञानरूपं मृत्युं अतिक्रम्य, देवतोपासनेन देवतात्मभावलक्षणं अमृतत्वं च गच्छति । एवमेव व्याकृताव्याकृतोपासनयोः समुच्चयानुष्ठाता तयोरेकैकानुष्ठातुरपेक्षया उत्कृष्टतरं फलमश्नुते । तत्र व्याकृतोपासनया अनैश्वर्या-

दिरूपमृत्युतरणं, अव्याकृतोपासनया च प्रकृतिलयलक्षणं अमृतत्वं फलं--इत्येवंक्रमेण पुरुषार्थसंबन्धः । एतावती संसारगतिः ॥

(१५-१८.) यो यथोक्तकर्मकृदुपासकश्च स स्वानुष्ठानबलेन मरणकाले आदित्यमण्डलस्थापरब्रह्मानुज्ञां लब्ध्वा देवयानेन पथा गत्वा समुच्चयानुष्ठानफलं अमृतत्वं च लभते । तदेवं शोकमोहाद्यखिलसंसारानर्थस्यात्यन्तं निवर्तको निवृत्तिधर्मः, चिरकालस्थाय्यमृतत्वदायकः प्रवृत्तिधर्मश्च - इति द्विप्रकारकोऽयं वेदोक्तो धर्मः ॥

---

## अथोपनिषत्[1]

(माध्यन्दिनपाठः)

ईशावास्यमिद॑ सर्वं
यत्किंच जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा
मा गृधः कस्य स्विद्धनम् ॥ १ ॥

कुर्वन्नेवेह कर्माणि
जिजीविषेच्छत॑ समाः ।
एवं त्वयि नान्यथेतोऽस्ति
न कर्म लिप्यते नरे ॥ २ ॥

* असुर्या नाम ते लोका
अन्धेन तमसावृताः ।

---

1. आचार्यैः काण्वपाठानुसारेणैवेयं उपनिषद् व्याख्याता । क्वचित्तु माण्डूक्यकारिकादौ माध्यन्दिनपाठानुसारेणापि विवरणं कृतम् । अतो शाखाद्वयादृतपाठयोर्भेदज्ञानार्थम् अत्र माध्यन्दिनपाठोऽपि प्रदर्श्यते । अत्र पाठे *एवं चिह्नितेषु मन्त्रेषु अक्षरविन्यासभेद आनुपूर्वीभेदो वा दृश्यते । काण्वपाठस्थः 'पूषन्नेकर्षे' इति मन्त्रस्तु नास्त्येव ॥

ताꣳ स्ते प्रेत्याभिगच्छन्ति
ये के चात्महनो जनाः ॥ ३ ॥

अनेजदेकं मनसो जवीयो
नैनद्देवा आप्नुवन् पूर्वमर्षत् ।
तद्धावतोऽन्यानत्येति तिष्ठत्
तस्मिन्नपो मातरिश्वा दधाति ॥ ४ ॥

तदेजति तन्नैजति
तद्दूरे तद्वन्तिके ।
तदन्तरस्य सर्वस्य
तदु सर्वस्यास्य बाह्यतः ॥ ५ ॥

* यस्तु सर्वाणि भूतानि
आत्मन्येवानुपश्यति ।
सर्वभूतेषु चात्मानं
ततो न विचिकित्सति [1] ॥ ६ ॥

यस्मिन् सर्वाणि भूतानि
आत्मैवाभूद्विजानतः ।

1. न विचिकित्सति - परिहृतसंशयो भवति ।

तत्र को मोहः कः शोक
एकत्वमनुपश्यतः ॥ ७ ॥

स पर्यगाच्छुक्रमकायमव्रण-
मस्नाविरꣳ शुद्धमपापविद्धम् ।
कविर्मनीषी परिभूः स्वयंभू -
र्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः
समाभ्यः ॥ ८ ॥

* अन्धं तमः प्रविशन्ति
येऽसंभूतिमुपासते ।
ततो भूय इव ते
तमो य उ संभूत्याꣳ रताः ॥ ९ ॥

* अन्यदेवाहुः संभवात्
अन्यदाहुरसंभवात् ।
इति शुश्रुम धीराणां
ये नस्तद्विचचक्षिरे ॥ १० ॥

*संभूतिं च विनाशं च
यस्तद्वेदोभयꣳ सह ।

विनाशेन मृत्युं तीर्त्वा
संभूत्यामृतमश्नुते । ॥ ११ ॥

* अन्धं तमः प्रविशन्ति
येऽविद्यामुपासते ।
ततो भूय इव ते
य उ विद्याया ँ रताः । ॥ १२ ॥

* अन्यदेवाहुर्विद्याया
अन्यदाहुरविद्यायाः ।
इति शुश्रुम धीराणां
ये नस्तद्विचचक्षिरे । ॥ १३ ॥

*विद्यां चाविद्यां च
यस्तद्वेदोभय ँ सह ।
अविद्यया मृत्युं तीर्त्वा
विद्ययामृतमश्नुते । ॥ १४ ॥

*वायुरनिलममृत-
मथेदं भस्मान्त ँ शरीरम् ।

ॐ क्रतो स्मर क्लिबे[1] स्मर
कृतꣳ स्मर ॥ १५ ॥

अग्ने नय सुपथा राये अस्मान्
विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो
भूयिष्ठां ते नम उक्तिं विधेम ॥ १६ ॥

*हिरण्मयेन पात्रेण
सत्यस्यापिहितं मुखम् ।
योऽसावादित्ये[2] पुरुषः
सोऽसावहम् । ओं[3] खं ब्रह्म ॥ १७ ॥

---

1. क्लिबे - क्लृप्ताय लोकाय ॥
2. आदित्ये यः शास्त्रप्रसिद्धः पुरुषः स एवाहमस्मि ॥
3. ओमिति नामनिर्देशः, खमिति रूपनिर्देशः ; खं - आकाशवत् सर्वगतं नित्यं परिपूर्णं ब्रह्म इति ध्यायेत् ॥

# परिशिष्टम्

------

## एकादशमन्त्रविषये भाष्यान्तरेषु दत्तं भगवत्पादीयं विवरणम्

### माण्डूक्ये अद्वैतप्रकरणे (२५ तमकारिकाभाष्ये)

"सत्यमेव देवतादर्शनस्य संभूतिविषयस्य विनाशशब्दवाच्यस्य च कर्मणः समुच्चयविधानार्थः संभूत्यपवादः । तथापि विनाशाख्यस्य कर्मणः स्वाभाविकाज्ञानप्रवृत्तिरूपस्य मृत्योरतितरणार्थत्ववद् देवतादर्शनकर्मसमुच्चयस्य पुरुषसंस्कारार्थस्य कर्मफलरागप्रवृत्तिरूपस्य साध्यसाधनैषणाद्वयलक्षणस्य मृत्योरतितरणार्थत्वम् । एवं ह्येषणाद्वयरूपाद् मृत्योरशुद्धेर्वियुक्तः पुरुषः संस्कृतः स्यात् । अतो मृत्योरतितरणार्था देवतादर्शनकर्मसमुच्चयलक्षणा ह्यविद्या । एवमेव एषणालक्षणादविद्यया मृत्योरतितीर्णस्य विरक्तस्य उपनिषच्छास्त्रार्थालोचनपरस्य नान्तरीयकी परमात्मैकत्वविद्योत्पत्तिरिति पूर्वभाविनीमविद्यामपेक्ष्य पश्चाद्भाविनी ब्रह्मविद्या अमृतत्वसाधना एकेन पुरुषेण संबध्यमाना अविद्यया समुच्चीयत इत्युच्यते । अतोऽन्यार्थत्वाद् अमृतत्वसाधनं ब्रह्मविद्यामपेक्ष्य निन्दार्थ एव भवति संभूत्यपवादो यद्यप्यशुद्धिवियोगहेतुः, अतन्निष्ठत्वात् ॥"

## ऐतरेयभाष्ये (आत्मा वा इत्यस्य संबन्धग्रन्थे)

यत्तु "विद्यां चाविद्यां च यस्तद्वेदोभयꣳ सह" इति, न तत्र विद्यावतो विद्यया सह अविद्यापि वर्तत इत्ययमर्थः। कस्तर्हि, एकस्मिन् पुरुषे एकदैव न सह संबध्येयातामित्यर्थः। यथा शुक्तिकायां रजतशुक्तिकाज्ञाने एकस्य पुरुषस्य। "दूरमेते विपरीते विषूची, अविद्या या च विद्येति ज्ञाता" इति हि काठके। तस्मान्न विद्यायां सत्यां अविद्यायाः संभवोऽस्ति। "तपसा ब्रह्म विजिज्ञासस्व" इत्यादिश्रुतेः। तपआदिविद्योत्पत्तिसाधनं गुरूपसदनादि च कर्म अविद्यात्मकत्वाद् अविद्योच्यते। तेन विद्यां उत्पाद्य मृत्युं कामं अतितरति। ततो निष्कामस्त्यक्तैषणो ब्रह्मविद्यया अमृतत्वमश्नुत इत्येतमर्थं दर्शयन्नाह - "अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते" इति॥

## तैत्तिरीयभाष्ये (१-११ अनुवाकव्याख्याने)

"केवलब्रह्मविद्यारम्भाच्च पूर्वं कर्माण्युपन्यस्तानि। उदितायां च विद्यायां "अभयं प्रतिष्ठां विन्दते", "न बिभेति कुतश्चन", "किमहं साधु नाकरवम्"- इत्येवमादिना कर्म-नैष्किञ्चन्यं दर्शयिष्यतीत्यतोऽवगम्यते पूर्वोपचितदुरितक्षयद्वारेण विद्योत्पत्त्यर्थानि कर्माणीर्ति। मन्त्रवर्णाच्च - "अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते" इति॥

[उपरि दत्तेषु भाष्यभागेषु प्रथमे देवतोपासनाकर्मसमुच्चयोऽविद्याशब्दवाच्यः, द्वितीये तपआदिविद्योत्पत्तिसाधनं अविद्या, तृतीये तुं चित्तशुद्ध्यर्थं कर्म अविद्येत्युक्तम् । सर्वथापि तु अविद्या साधनं, विद्या च पश्चादुदेष्यमाणेति निर्विवादम् । विद्यां चाविद्यां चेति समुच्चयार्थश्च - एकस्मिन्नेव पुरुषे क्रमेण संबन्धः, एकस्मिन्नेव पुरुषार्थे मोक्षरूपे अविद्यायाः परम्परितकारणत्वं, विद्यायाः साक्षात्साधनत्वं चेति स्पष्टमेव । सर्वेष्वेव भाष्यभागेषूपरिष्टान्निर्दिष्टेषु माध्यन्दिनपाठ एव अनुकूलतरः, 'योऽसावादित्ये पुरुषः सोऽसावहं ॐ खं ब्रह्म' इत्यैकात्म्योपसंहारात्, संभूत्युपासना मन्त्रस्य प्रथमतरं पठितत्वाच्चेति स्पष्टम् ॥

काण्वशाखायां तु अन्त्ये मार्गयाचनादिभ्यो लिङ्गेभ्यः विद्याशब्दः केवलोपासनापरो व्याख्यातो भाष्यकारैः । उपनिषद्भाष्ये एव केवलं काण्वपाठमनुसृत्य अन्यत्र माध्यन्दिनपाठानुसारेण एतन्मन्त्रविवरणे हेतुर्न ज्ञायते । अत्र सुधिय एव प्रमाणम् ॥]

# अथ मन्त्राणां वर्णानुक्रमणिका


| मन्त्रप्रतीकम् | मन्त्रः | पृष्ठम् |
|---|---|---|
| अग्ने नय सुपथा राये | १८ | २७ |
| अनेजदेकं मनसो जवीयो | ४ | ८ |
| अन्धं तमः प्रविशन्ति | ९ | १८ |
| अन्धं तमः प्रविशन्ति | १२ | २१ |
| अन्यदेवाहुर्विद्यया | १० | १९ |
| अन्यदेवाहुः संभवात् | १३ | २२ |
| असुर्या नाम ते लोका | ३ | ७ |
| ईशावास्यमिदꣳ सर्वं | १ | ३ |
| कुर्वन्नेवेह कर्माणि | २ | ५ |
| तदेजति तन्नैजति | ५ | १० |
| पूषन्नेकर्षे यम सूर्य | १६ | २५ |
| यस्तु सर्वाणि भूतानि | ६ | ११ |
| यस्मिन् सर्वाणि भूतानि | ७ | १३ |
| वायुरनिलममृतं | १७ | २६ |
| विद्यां चाविद्यां च | ११ | २० |
| स पर्यगाच्छुक्रमकायमव्रणं | ८ | १४ |
| संभूतिं च विनाशं च | १४ | २३ |
| हिरण्मयेन पात्रेण | १५ | २४ |


------

# भाष्यस्थमुख्यशब्दसूची

## अत्र परामृष्टाः पृष्ठसंख्याः

अग्निहोत्रादीनि ५, १८, २०
अङ्गाङ्गिता १९
अजरामरत्वादि ८
अज्ञानम् २, ७, ३०
अणिमाद्यैश्वर्यम् २२, २३
अधिकारः ४
अधिकारविदः २
अधिकारी २
अधिदैवतात्मा २७
अध्यात्मपरिच्छेदः २७
अध्यस्तम् ३
अनधिकारप्रयोजकधर्मः २
अनुवादः १२
अनृतम् ३
अनैश्वर्यम् २३
अन्तःकरणम् ९
अपरब्रह्म २४
अमृतम् २०, २३, २४
अवान्तरफलम् १९
अविद्या ८, १८, १९, २१, ३०, ३१
अविद्याकार्यम् १३
अव्यक्तम् १२
अव्याकृतम् २१, २२, २३
असुराः ७
आगमः २०
आत्मा ४, २०
आत्मचैतन्याभासः ९
आत्मज्ञाननिष्ठा ४
आत्मतत्त्वम् ८
आत्मस्वरूपनिष्ठा १६
आत्मैकत्वज्ञानम् १७
आत्मैकत्वादि २, १३
आदित्यमण्डलस्थं ब्रह्म २५, २६
आपेक्षिकं अमृतम् ३१
आभासः ९
ईट् ३

ईश्वरः १५
ईश्वरभावना ४
ईश्वरात्मभावना ४
उत्पाद्यम् १
उपाधिः ८, ९
एषणात्रयम् ४, ६, १६
औपाधिकम् ३
कर्तृत्वभोक्तृत्वादिकम् ४
कर्तृभोक्तृरूपम् २
कर्म ५, १०, २४, ३१
कर्मनिष्ठा ६, १५, १६
कर्मशेषता २
कामकर्मबीजम् १२, २१
कारणम् २१
कारणशरीरम् १४
कार्यब्रह्म २१, २२
कार्यकरणसङ्घातः १२
कार्यकरणविक्रिया १०
गीताः २
चराचरम् ३
चेतयिता १२
चैतन्याभासः ९
जामिता १०, १९
ज्ञाननिष्ठा ४, ६, १५, २४
तमः ७
त्यक्तम् ४
दक्षिणमार्गः २८
देवतात्मगमनम् २०
देवताज्ञानम् १८
देवादयः ७
दैववित्तम् १७, २३
द्वैतम् ४
धर्माधर्मादिपापम् १४
नामरूपकर्म ४
नामरूपक्रिया ११
नित्यमुक्तः १५
निरुपाधिकम् ९
निर्गुणः १२
निर्विशेषः १२
निवृत्तिमार्गः ६
निषेकादिश्मशानान्तम् २४
परमात्मज्ञानम् १७

परमात्मविद्या २९
परमात्मा ३
परमार्थसत्यम् ३
परमार्थात्मा १३
परमेश्वरः ३
परिव्राट् १२
पुरुषः २६
पुरुषार्थः २०, २२
पौराणिकाः २२
प्रकृतिः २१
प्रकृतिलयः २२, २३
प्रजापतयः १५
प्रतीकम् २८
प्रत्यगात्मा ३
प्रत्ययः १२
प्रयोजनम् २
प्रवर्ग्यान्तं ब्राह्मणम् २४
प्रवृत्तिः २४
ब्रह्मलोकः ९
ब्रह्मवर्चस् २
मनः ९
मन्त्रः १, २, ४, ६, ७, १०, १३, १४
मानुषवित्तम् २३
मिथ्या ४
मुमुक्षुः १२
मृत्युः २०, २३
मोक्षधर्माः २
लिङ्गम् २७
लिङ्गशरीरम् १४
लोकाः ७
विकल्पः ९, ३०
विकार्यम् १
विकारजातम् ४
विक्रिया ९
विद्या १८, १९, २०
वेदाचार्यः ६
व्याकृतम् २१, २२
व्यासः ६
शोकमोहादयः २, १३, ३१
संशयः ३०
संस्कार्यम् २
संवत्सराः १५

| | | | |
|---|---|---|---|
| सङ्कल्पः | ८, ९ | सर्वज्ञः | १५ |
| सत्यात्मा | २५ | सर्वप्रत्ययसाक्षी | १२ |
| संन्यासः | ४, ६, १६, २४ | सर्वात्मभावः | २४ |
| संन्यासी | ६, १६ | साध्यसाधनभेदः | १७ |
| सप्तान्नसर्गः | १६ | सूत्रम् | १०, २७ |
| समुच्चयः | १७, २० | स्थावरः | ७, १२ |
| संबन्धः | २ | स्थूलशरीरम् | १४ |
| संभूतिः | २१ | हिरण्यगर्भः | २१, २३ |

# भाष्योद्धृतानां प्रमाणवाक्यानां मूलग्रन्थानुक्रमः

अत्र कंसे दत्ता अङ्काः तत्तद्ग्रन्थमन्त्रादिसूचकाः, अतयादर्शितास्तु

एतद्ग्रन्थपृष्ठसंख्यासूचकाः


## कठोपनिषत्-

| | | |
|---|---|---|
| दूरमेते विपरीते विषूची | (१-२-४) | ३० |
| यथा कर्म यथाश्रुतम् | (३-२-७) | ७ |

## तैत्तिरीयोपनिषत् -

| | | |
|---|---|---|
| भीषास्माद्वातः पवते | (२-७) | १० |

## बृहदारण्यकोपनिषत् -

| | | |
|---|---|---|
| कर्मणा पितृलोकः | (१-५-१६) | १७, १९ |
| किं प्रजया करिष्यामो... | (४-४-२२) | १६ |
| तद्यत्तत् सत्यमसौ स आदित्यो... | (५-५-२) | २५ |
| नान्योऽतोऽस्ति द्रष्टा | (३-७-२३) | १५ |
| प्रज्ञानघन एव | (४-५-१३) | ११ |
| मन एवास्यात्मा वाग्जाया | (१-४-१७) | १५ |
| य आत्मा सर्वान्तरः | (३-४-१) | ११ |
| विद्यया देवलोकः | (१-५-१६) | १७, १ |
| सोऽकामयत जाया मे स्यात् | (१-४-१७) | १५ |

**महानारयणोपनिषत् -**

| | | |
|---|---|---|
| न्यास एवात्यरेचयत् | (२१-२) | ६ |

**मोक्षधर्मः -**

| | | |
|---|---|---|
| द्वाविमावथ पन्थानौ.... | (२४१-६) | ६ |

**शतपथब्राह्मणम् -**

| | | |
|---|---|---|
| न तत्र दक्षिणा यन्ति | (१०-५-४-१६) | १७ |
| वियया तदारोहन्ति | (१०-५-४-१६) | १७,१९ |

**श्वेताश्वतरोपनिषत् -**

| | | |
|---|---|---|
| अत्याश्रमिभ्यः परमं पवित्रम्.... | (६-१) | १६ |

**अनिर्ज्ञातस्थलानि वाक्यानि -**

| | |
|---|---|
| अध्वरे पशुं हिंस्यात् | २९ |
| इमौ द्वावेव पन्थानौ.... | ६ |
| न जीविते मरणे वा..... | ६ |
| न हिंस्यात् सर्वा भूतानि | २९ |


----------

# शुद्धशाङ्करप्रक्रियाप्रकाशकाः
# कतिचन वेदान्तग्रन्थाः
# अध्यात्मप्रकाशकार्यालयेन प्रकाशिताः

अध्यात्मप्रकाशकार्यालयप्रकाशितेषु उपनिषद्भाष्येषु विशेषोऽयं यत् (१) 'विषयानुसारेण प्रविभक्तग्रन्थशरीरत्वम्' (२) तत्तद्विभाग-प्रतिपाद्यविषयसूचकशिरोलेखनिवेशः, (३) पाठान्तरनिर्देशभाष्यान्तर-संवादादिस्थलसूचनापूर्वकं हितमिताद्यष्टिप्पणदानम्, (४) विचारप्रचोदिका पीठिका, (५) उपनिषन्मूलस्य स्थूलाक्षरैः भाष्यस्य मध्यगात्राक्षरैः, उपनिषत्सारादि परिशिष्टभागस्य च सामान्यसूक्ष्माक्षरैः - इति चैवं विविधगात्रस्फुटाक्षरैरङ्कनं च इति । सुन्दराक्षरैः शुक्लमसृणपत्रे मुद्रापितानामप्येषां पुस्तकानां गात्राकारानुगुण्येन परिमितमूल्येनैव वितरणे प्रयत्नः कृतः । सर्वत्र टिप्पणव्याख्यानादिकं च नूत्नतया श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिभिरनुगृहीतम् ॥

**१. ईशावास्योपनिषद्भाष्यम् - (१९३२ ; २००२)** ८ +४८ = ५६ पु.

समूलं सभाष्यटिप्पणयुतं च । उपनिषदो माध्यन्दिनपाठोऽपि दत्तः जिज्ञासूपयोगिमन्त्रानुक्रमणिकाशब्दसूच्यादिसमेतं विचारप्रचोदक-पीठिकायुक्तं च ॥

**२. केनोपनिषद्भाष्यम् (१९५९)** २० + १११ = १३१ पु.

ईशावास्यभाष्यवदेव सर्वपरिकरोपेतम् पदभाष्यं वाक्यभाष्यं च । अत्र भाष्यहृदयविसंवादिटीकाभिप्रायाः समालोचिताः । पदवाक्यभाष्य-योरेककर्तृकत्वमसंभावितमिति सविमर्शं पीठिकायामुपपादितं च ॥

**३. काठकोपनिषद्भाष्यम् (१९६२)** ३४+ १५५ = १८९ पु.

केनभाष्यवत् सर्वपरिकरोपेतम् ।

**४. मुण्डकोपनिषद्भाष्यम् (१९६०)** २२ + १३४ = १५२ पु.

कठभाष्यवत् सर्वपरिकरोपेतम् । पीठिकायां न केवलं भाष्यविषयविवेचनम्, किं तु भाष्यतट्टीकाकारयोः मतभेदविमर्शनं च कृतमत्र ॥

**५. माण्डूक्यरहस्यविवृतिः (१९५८,२००२)** १२८+ ४९० = ६१८ पु.

श्रीसच्चिदानन्देन्द्रसरस्वतीभिरनुगृहीतायाम् अन्वर्थाभिधानायामस्यां माण्डूक्योपनिषत्कारिकाव्याख्यायां माडूक्योपनिषदि तत्कारिकासु च गर्भीकृतानि नैकानि रहस्यानि श्रीगौडपादसंमतवेदान्तप्रक्रियानुसारेण तथा विवृतानि यथा मोक्षमाणानां जिज्ञासूनामस्याः श्रवणमननाभ्यां छिद्येरन् सर्वसंशयाः भिद्येत च हृदयग्रन्थिरात्मसत्यानुबोधेन । उपनिषदः कारिकणां च पार्थक्येन शाङ्कर भाष्यं दमास्ति । श्रीशङ्करभगवत्पादभाष्यवाक्यार्थश्च प्रतिपदं प्रस्थानत्रयभाष्यान्तरव्याख्यान्तरसङ्गानेन मतान्तरदोषाविष्करणपूर्वकं तथा व्याकृतो यथा विशुद्धसंप्रदायाध्वना गतिर्निर्विघ्ना भवेत् पाठकानाम् । विशिष्य च अलातशान्तिप्रकरणे प्राचीनग्रन्थतत्त्वशोधकोत्थापितमतान्तरसंक्रान्तिशङ्कानिरसनपूर्वकं श्रीगौडपादसंमता वेदान्तप्रक्रिया प्रदर्शिता, पूर्वतनप्रकरणत्रयप्रक्रियया एकवाक्यतां गमिता च । आङ्ग्लभाषामय्या गैर्वाणवाणीमय्या च भूमिकया श्रीगौडपादसंमतप्रक्रियाया असाधारणं स्वरूपं माहायानिकप्रक्रियातो वैलक्षण्यस्फुटीकरणपूर्वकं हृदयंगमं कृतम् ॥

**६. तैत्तिरीयोपनिषच्छीक्षावल्लीभाष्यम् (१९६१)** २० + ७६ = ९६ पु.

टिप्पण्यादिसर्वपरिकरोपेतं मुण्डकभाष्यवत् ॥

**७. तैत्तिरीयोपनिषद्भाष्यम् : आनन्दवल्ली भृगुवल्ली च (१९६२) :**

४० + ४०७ = ४४७ पु.

सभाष्यम् - श्रीसच्चिदानन्देन्द्रसरस्वतीनिर्मित'भाष्यार्थविमर्शिनी' नामव्याख्यासहितम् । व्याख्यायां भाष्याक्षरानुक्रमेणैव विषयोपपादनं कृतम् । भाष्ये अर्वाचीनमतान्तरप्रविष्टवेदान्तिभिरुत्थाप्यमानशङ्कानां निरसनपूर्वकं विशुद्धशाङ्करप्रक्रियायाः श्रैष्ठ्यं च सम्यगाविष्कृतम् ।

पुस्तकस्यान्ते अनुवाकसूची, उपनिषत्खण्डसूची, अर्थनिर्देशपूर्वकं भाष्यस्थमुख्यशब्दानां सूची, विमर्शिनीगतमुख्यविषयसूची च - इत्येता वर्णानुक्रमसूच्यो निवेशिताः । आंग्लगैर्वाणभूमिकयोः भाष्यगता मुख्यविषयाः सप्रपञ्चं परिशीलिताः - इति सर्वाङ्गसुन्दरं परिष्करणमिदम् ॥

**८. सुगमा (१९५५, १९९९) :** १६ + ११९ = १३५ पु.

अध्यासभाष्यव्याख्या । श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिभिर्विनिर्मिता । प्रचलितव्याख्यानानां भिन्नभिन्नप्रस्थानावलम्बनत्वात् शुद्धं शाङ्करदर्शनं कीदृशम्, कथं च तदविवादम्, अविरुद्धं च स्यादिति संशयानानां मनःसमाधानाय प्रस्थानत्रयभाष्यैककण्ठ्यम् आदर्शयन्ती सार्वत्रिकानुभवानुसारिवेदान्तप्रक्रियाप्रख्यापनी इयं व्याख्या ॥

**९. सूत्रभाष्यार्थतत्त्वविवेचनी-१ (१९६४) :** १६+ १२२ = १३८ पु.

जिज्ञासाधिकरणभाष्यस्य नूतनेयं व्याख्या श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिभिः प्रणीता । सार्वत्रिकानुभवानुसारि शाङ्करं प्रस्थानं स्वासाधारणधर्मविशिष्टं व्याख्यानगतप्रस्थानान्तरकलङ्करहितं दूरीकृतभाष्यान्तरदुराक्रमं च परिशुद्धरूपेणाविष्कृतमत्र ॥

**१०. सूत्रभाष्यार्थतत्त्वविवेचनी-२ (१९६५) :** १८+ १४६ = १६४ पु.

जन्माद्यधिकरणभाष्यव्याख्या श्री सच्चिदानन्देन्द्रसरस्वतीविरचिता ।

यथैव जिज्ञासाधिकरणव्याख्यायां ब्रह्मज्ञानसतत्त्वनिर्धारणं कृतम्, एवमेवात्र जगज्जन्मादिकारणसतत्त्वनिर्धारणं कृतम् सर्ववेदान्तादृताम् अध्यारोपापवादप्रक्रियामनुसृत्य । परिशिष्टे च जिज्ञासाधिकरण-भाष्यव्याख्यायामिव सूत्रार्थसंबद्धाः केचन विषयाः भगवत्पादसंमतां वेदान्तप्रक्रियां निर्दिधारयिषूणाम् उपकाराय विचारिताः ।

**११. सूत्रभाष्यार्थतत्त्वविवेचनी - ३ (१९७०) :** २७ + ३१२ = ३३९ पु.

शास्त्रयोनित्वाधिकरणसमन्वयाधिकरणभाष्ययोर्व्याख्या । पूर्ववदेव शुद्धशाङ्करप्रक्रियाप्रकाशिनी । परिशिष्टचिन्तायां शास्त्रप्रामाण्यसतत्त्वविमर्शः, श्रवणादीनां स्वरूपकृत्यादिगता चिन्ता इत्याद्याः विषयाः संकलिताः ।

**१२. शुद्धशाङ्करप्रक्रियाभास्करः (१-२) (१९६४)** ४ + ३८ = ४२ पु.

वेदान्तसिद्धान्तनिर्णयः, शाङ्करसंप्रदायनिर्णयश्च - इति किरणद्वयात्मकः प्रथमो भागः ।

**१३. शुद्धशाङ्करप्रक्रियाभास्करः (३-४-५) (१९६४)** ४ + ४८ = ५२ पु.

अस्मिन् द्वितीये भागे शाङ्करवेदान्तमर्यादा, शाङ्करवेदान्त-प्रक्रियास्वरूपम्, अध्यारोपापवादविशेषश्च - इत्येते विषयाः प्रतिपादिताः ।

**१४. शुद्धशाङ्करप्रक्रियाभास्करः (६-७) (१९६५)** ४ + ५० = ५४ पु.

अस्मिन् तृतीये भागे - शाङ्करप्रस्थानस्य प्रस्थानान्तरेभ्यो वैलक्षण्यं स्फुटितम्, शाङ्कराद्वैतस्य बौद्धमतसाम्यशङ्का च परिहृता ।

**१५. गीताशास्त्रार्थविवेक : (१९६६) :** ३० + १८६ = २१६ पु.

श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिभिरनुगृहीतोऽयं ग्रन्थः । अल्पकायेनाप्यनेन प्रकरणेन सुचिन्तितेन, श्रीशाङ्करभगवत्पादभाष्यादृत एव

वेदान्तार्थो गीताचार्यानुगृहीत इति, स एव चानुसृतः परमपुरुषार्थदायी इति च जिज्ञासवो निःसंशयं विजानीयुः । अत्र प्रप्रथमं साङ्ख्य-योग-कर्म-ध्यान-भक्ति - ज्ञानादिपदार्थानां विवेकः कृतः । तदनु च कर्मयोग - ध्यानयोग - भक्तियोग - ज्ञानयोगानां परस्परसंबन्धो निरूपितः । परिशिष्टे च भागे साङ्ख्ययोगदर्शनाभ्यां गीतादर्शनस्य सालक्षण्यवैलक्षण्ये विवेचिते येन स्पष्टं विज्ञायेत सर्ववेदान्तसिद्धान्त एव परिशुद्धः स्वीकृतोऽत्र शास्त्रे इति ।

**१६. ब्रह्मविद्यारहस्यविवृतिः (१९६९) :** १८ +१३२ = १५० पु.

सगुणनिर्गुणब्रह्मविद्याविवेकेन जिज्ञासूनां निरायासप्रवेशः ब्रह्मणि यथा लभ्येत तथा श्रीचरणैः छान्दोग्योपनिषदोऽष्टमोऽध्यायोऽत्र व्याख्यातः ।

**१७. नैष्कर्म्यसिद्धि : ('क्लेशापहारिणी' व्याख्या सहिता) (१९६८, २००२) :** ५४ +४६१ = ५१५ पु.

व्याख्यानकर्तारः श्रीसुरेश्वराचार्यैः प्रमाणीकृतोपदेशसाहस्रीतः वार्तिकद्वयतश्च श्लोकान् समुद्धृत्य वार्तिकप्रस्थानविशुद्धसंप्रदायमाविरकार्षुः । सत्वरं जिज्ञासुभिरवलोकनीया व्याख्येयम् ।

**१८. वेदान्तप्रक्रियाप्रत्यभिज्ञा (१९६४) :** २५०+६७२ = ८२२ पु.

श्रीसच्चिदानन्देन्द्रसरस्वतीभिर्विनिर्मितोऽयं स्वतन्त्रो निबन्धः । तत्रास्मिन् प्रथमे सम्पुटे सर्वत्र वेदान्तेषु अध्यारोपापवादन्यायाश्रया एकैव प्रक्रिया प्राधान्येन परिगृहीतास्ति वेदान्ताभियुक्तैरित्येतद्दर्शितमत्र । अस्याः प्रक्रियाया अनादरादेव हेतोः सर्वेऽपि वावदूकाः वेदान्तोपदिष्टमात्मैकत्व -मनुभवारूढमापादयितुं नाशक्नुवन्नित्येतच्च निदर्शितम् अतिप्राचीन-कालादारभ्य सर्वज्ञात्ममुनिसमयपर्यन्तवृत्तवेदान्तविचारेतिहाससङ्क्षेपोपस्थापनेन ।

विस्तृतांग्लभाषामयभूमिकया संस्कृतभाषामयभूमिकया च समलङ्कृतः, प्रधानविषयानुक्रमणिकासहितश्च ।

**१९. वेदान्तबालबोधिनी (१९५९) :** ६ +५४ = ६० पु.

भगवत्पादविरचित प्रातःस्मरणस्तोत्रस्य प्रश्नोत्तररूपं व्याख्यानम् । भाष्यकारोक्तीनां सरणिमेवानुसृत्य वेदान्तसिद्धान्तोऽत्र जिज्ञासूनां हृदयंगमितः ।

**२०. वेदान्तडिण्डिमः (१९३५, २००२) :** १० + ८० = ९० पु.

सुप्रसिद्धमिदं प्रकरणं **भावबोधिन्याख्यया** व्याख्यया सहितम् । व्याख्यायां ललितया शैल्या, श्रुतिप्रमाणवचनोदाहरणपूर्वकं श्लोकार्थो विवृतः । युक्त्या समुपबृंहितश्च ।

**२१. विशुद्धवेदान्तसारः (१९६८) :** १८ + ८६ = १०४ पु.

अत्र जिज्ञासुजनचित्तभूमिकाविशेषानुसारेण अनुभवप्रधानदृष्ट्या मनःप्रधानदृष्ट्या इन्द्रियप्रधानदृष्ट्या चेति वेदान्तोपदेशस्त्रेधा विभज्य प्रदर्शितः ।

**२२. विशुद्धवेदान्तपरिभाषा (१९६९) :** १६+१३० = १४६ पु.

ब्रह्म, जगत्, जीव इति पदार्थत्रयस्य सतत्त्वम्, जगद्ब्रह्मणोः जीवब्रह्मणोश्च संबन्धश्च साम्प्रदायिकपरिभाषाजातमवलम्ब्य अत्र निरूपितः ।

**२३. शाङ्करं वेदान्तमीमांसाभाष्यम् (स्वयं व्याख्यातम्) (१९७४) :**

१६ + १०५ = १२१ पु.

बादरायणीयवेदान्तमीमांसाभाष्यस्य उपोद्घातरूपम् अध्यासभाष्यं तत्त्वबुभुत्सूनां कृते गीर्वाणाङ्ग्लोभयभाषामयविवरणसंवलितम् ।

## २४. वेदान्तविद्द्रोही (१९६२) : ६६ + ९८ = १६४ पु.

शाङ्करभाष्यतद्व्याख्यानप्रस्थानयोर्वैलक्षण्यमधिकृत्य एकादश-विद्वत्प्रकाण्डानामभिप्रायाः अत्र दत्ताः । विद्वदभिप्रायसंग्राहिका आंग्लभूमिकाविभूषितश्च ।

## २५. पञ्चपादिकाप्रस्थानम् (१९६६) : ३४+ १७१ = २०५ पु.

प्रप्रथमोऽयं महान् प्रयत्नः सुरभारतीवाङ्मये पञ्चपादिका-टीकाप्रस्थानस्य सुमहद्वैलक्षण्यं भाष्यप्रस्थानतोऽस्ति, विरोध एव च क्वचित् प्रमेयविशेषसतत्वनिर्धारणे - इति सप्रमाणं निर्णेतुम् । महता आयासेन अत्र नैकानि भाष्यवाक्यानि सङ्कलितानि प्रकरणप्रणेतृभिः श्रीसच्चिदानन्देन्द्र-सरस्वतीसंयमिभिः यथोक्तं प्रस्थानविरोधावगमं दृढीकर्तुम् । आस्थितश्च प्रयत्नः पण्डितप्रकाण्डान् सकलविद्यानिलयस्थप्राध्यापकांश्च विश्वासयितुं यथा स्वतन्त्रप्रस्थानत्वेनैव एतदुभयं प्रत्यभिज्ञाय भाष्यतट्टीकयोरसङ्करं पृथक् पृथक्पाठनप्रणालीप्रणयनेन शुद्धशाङ्करप्रस्थानसतत्त्वबोधः सुखतरो लाभप्रदश्च भवेदिति ॥

## २६. श्रीशङ्करहृदयम् (१९२९) ३६ + २३८ - २७३ पु.

श्रीसच्चिदानन्देन्द्रसरस्वतीभिः पूर्वाश्रमे विनिर्मितं प्रकरणमिदं पूज्यपादानां श्रीशङ्करभगवत्पादानां वेदान्तप्रक्रियारहस्यभेदकानां गभीराशयं विवृणोति । सर्वत्र चात्र प्रमाणवाक्यान्युदाहृतानि परःशतम् श्रीमद्भाष्यकृतां तत्साक्षादन्तेवासिनां श्रीसुरेश्वराचार्याणां सुप्रसिद्ध-माण्डूक्यकारिकाकृतां श्रीगौडपादाचार्याणां च । अनुशाङ्करवेदान्तिभिः संप्रदायविरोधेन नूत्नतया अभ्यूहितस्य औपनिषदप्रक्रियामलिनी-करणमूलस्य मूलाविद्यावादस्य समूलोत्पाटनेरूपोऽयं निबन्धः सम्यग्दर्शन-लालसजनग्राहिशुष्कतर्कपिशाचोच्चाटने महामन्त्ररूपो विजयते ।

**२७. पारमहंस्यमीमांसा (१९९४) :** १४ + १४६ = १६० पु.

संन्यासाश्रमः कथं शास्त्रेण विहितः, संन्यासस्य प्रकाराः, यतीनां नित्यानि अनुष्ठेयानि, संन्यासिनां मुख्यो ध्येयः, प्रणवचिन्तनस्य प्रकाराः - इत्यादयो विषयाः शाङ्करभाष्यं प्रमाणीकृत्य श्रुतिस्मृतिसङ्गतिपूर्वकं निरूपिता अस्मिन् प्रबन्धे । पारमहंस्यस्य वैशिष्ट्यं सम्यक् दर्शितमत्र । श्री सच्चिदानन्देन्द्रसरस्वतीभिर्विरचितोऽयं ग्रन्थः श्रुतिशङ्करसंस्कृत-संशोधनप्रतिष्ठानम् द्वारा प्रकाशितः ।

**२८. भक्तिचन्द्रिका - नारदभक्तिसूत्राणां व्याख्या (१९९९) :**
८ + २१४ = २२२ पु.

नारदप्रणीतानां भक्तिसूत्राणां व्याख्यारूपोऽयं ग्रन्थः । शाङ्करसूत्र-भाष्यशैलीमनुकरोति इयं नूत्ना व्याख्या । भक्तिविषये संभावितानां सम्भाव्यमानानां बहूनां संशयानां परिहारोऽत्र दर्शितः । भक्तिभावुकैः रसिकैः अवश्यं अवलोकनीयोऽयं ग्रन्थः । कन्नडमूलग्रन्थरचयितारः-श्री स्वामिनः, संस्कृतानुवादकः - विद्वान् वेङ्कटेशशर्मा शास्त्री, होसहल्ली, शिवमोगा ॥

Phone : 0817-573820

# ABOUT KARYALAYA

(ESTABLISHED 1920)

HOLENARSIPUR (Hassan Distrit, Mysore State)

An Institution to help the interpretation of Indian Culture by stimulating the study and practice of the Adhyamata Vidya - Philosophy and Religion in its universal aspect - especially as revealed in the Upanishadsand allied literature.

1. Has so far published more than Two HUNDRED BOOKS in Kannada, English and Sanskrit.
2. Arranges for frequent Discussions, Discourses. and Public Lectures, Vedanta Classes in the morning form a regular feature.
3. Has a free lending Library and a Reading Room for the public.
4. Conducts a Kannada Monthly Magazine called the 'Adhyatma Prakasha', devoted to Jnana, Bhakti and Vairagya.
5. Maintains a Vedantic College with the object of training up model students who regard the spread of Vedantic ideas as their goal in life.



## ABOUT THE AUTHOR

His Holiness Paramahamsa Sri Sri Satchidānandendra Saraswathi Swamiji, the founder of Adhyātma Prakāśa Kāryālaya and author of over 200 reputed works on *Advaita* in Kannada, sanskrit and English blessed the earth with his presence for ninety six useful and rich years (1880-1975).

His works are characterized by vast and deep scholarship, clear and precise perception and an attractive and lively sytle. His authentic interpretation of Śaṅkara has been greatly recognized by both the East and the West. He was not just a rare and accomplished individual but a mighty and magnificient institution.

Our pranams at the holy lotus feet of Swamiji.

Om tat Sat

**ADHYATMA PRAKASHA KARYALAYA**
T. R. Nagar, Bangalore - 560 028